In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 07

श्रीकृष्णकविप्रणीतम्

॥ मदनगोपालमाहात्म्यम् ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डॉ. के. वरलक्ष्मीः

सहाचार्या (संशोधनम्), उपनिदेशिका

सहायकः

डॉ. के वि सूर्यप्रकाशः

सहायकाचार्यः (संशोधनम्)

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) – 07
In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णकविप्रणीतम्

॥ मदनगोपालमाहात्म्यम् ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च
आचार्यः के. नीलकण्ठः
निदेशकः

सम्पादिका
डॉ. के. वरलक्ष्मीः
सहाचार्या (संशोधनम्), उपनिदेशिका

सहायकः
डॉ. के वि सूर्यप्रकाशः
सहायकाचार्यः (संशोधनम्)

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 07

Madanagopālamāhātmyam

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Page Setup
by
Joshi Bharadwaj

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Madanagopālamāhātmyam

ISBN – 978-81-969575-8-2

© Sanskrit Academy

Year : 2024
Pages : xx+72
Copies : 300
Price : ₹ 300

Sanskrit Academy Sasthyabda Granthamālā (iii) - 07
In Public domain: Digitization Muthulakshmi Research Academy

Madanagopālamāhātmyam

of

Sri Krishna Kavi

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor & Project Investigator

Prof. K. Neelakantham

Director

Editor

Dr. K. Varalakshmi

Associate Professor (Research)

Dy. Director

Assistance

Dr. K V Suryaprakash

Assistant Professor (Research)

Sanskrit Academy

Adarsha Shodha Sansthan

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 07

Madanagopālamāhātmyam

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Page Setup
by
Joshi Bharadwaj

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Madanagopālamāhātmyam

ISBN – 978-81-969575-8-2

© Sanskrit Academy

Year	:	2024
Pages	:	xx+72
Copies	:	300
Price	:	₹ 300

In Public domain. Digitization Muthulakshmi Research Academy

Foreword

ओम् श्री गुरुभ्यो नमः

॥श्रीशङ्करभगवत्पादाः विजयन्ते॥

Previously we have published four books Śrīnivāsa vilāsacampūḥ, Raghunāthavijayacampūḥ, Kārtikotsava dīpikā, Uttararaṅgamāhātmyam composed by SriKrishna kavi who is also famous as Hosadurgam Krishnamacharya. According to the History this Krishnakavi is said to have been lived between 1830 - 1919, and composed 100 above books on various Shastras, Kavyas, stotras. He took sannyasaasrama on the advice of his gurus and became famous as Srimatparamahamsa Parivrajakacharya Sri Krishna Brahmateertha Yateendra. This great poet has written some Kavyas in Sanskrit on the holy places/sacred temples of erstwhile Palamuru (Mahaboobnagar) district of Telangana State. Among the above four books, the first three are champukavyas and the fourth one Uttararaṅgamāhātmyam was written in the style of Purāṇa Literature. He wrote *Uttararaṅga māhātmyam* in praise of Lord **Sriranga** of Srirangapuram near Wanaparthy. According to the history the **temple of Sri Ranga** was built in the year 1670 on the hill called Garudadri near the village Korivipadu in Palamuru district. He composed *Uttararaṅga māhātmyam* in 10 adhyayas and 513 verses. He narrated the story of Garuda, Kadru and Vinata in beautiful Sanskrit.

And now we are bringing out one more beautiful book titled as Madana gopālamāhātmyam which was also written in the style of Purana[1]. Sri Krishnakavi must have

---

[1] यत्र दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ।

 In Public domain. Digitization Muthulakshmi Research Academy

written these two books in the style of Purana since he has taken the theme of describing the greatness of sacred temples of deities Sriranga and Madanagopala. He, at the end of every chapter said इति श्रीमद्भविष्योत्तरपुरणे श्रीजटायुक्षेत्र मदनगोपालमाहात्म्ये पाण्ड्ययात्राप्रसङ्गो नाम प्रथमोऽध्यायः[2] ।

Madana gopālamāhātmyam:

Srikrishnakavi composed this book in 12 chapters and 537 shlokas. According to the history poet must have composed it during 1860 to 1884. Though the poet did not mention the name of Raja Surabhi Venkatajagannatha Rao bahadur anywhere in the Raja Surabhi Venkatajagannatha Rao bahadur Madana gopālamāhātmyam, the historians like Tumaati Donappa have made it clear that Krishnakavi wrote this poem on the advice of Raja Surabhi Venkatajagannatha Rao bahadur. He composed this to glorify the magnanimity of lord Madanagopala the prime deity of temple of Madanagopalaswamy. This temple was constructed in Jataprolu samsthan near the Palamuru in Telangana. This Jataprolu of Telangana is described as Jatayu Kshetra in the Puranas. the main deity in this temple is Lord Krishna along with Rukmini and Satyabhama. SriKrishnakavi said in the eighth canto of this book that this Temple will become famous and lord Madanagopala bless the devotees whoever worship him sincerely[3].

उभयोर्यत्र दृष्टं हि तत्पुराणैः प्रगीयते।। (नारदपुराणे उत्तरखण्चे 24 अध्याये)

[2] It is also said that Bhavishya and Bhavishyottarapurana consist of greatness of gods and goddesses, description of holy places in Bharatadesha, descrition of Kings who ruled Bharatadesha and importance of vows (Vratas) which are to be performed by human beings for attaining wellness in the life.

3. मदनाकृतिरम्यत्वाद्दिव्यमङ्गलविग्रहः । सोऽयं मदनगोपाल इति नाम्नेरितस्त्वया ।।

In Public domain. Digitization Muthulakshmi Research Academy

Pāṇḍyarājā on his pilgrimage to Dakshinabharata desha, had Darshan of Sri Ranganatha, lord Venkateshwara and Mallikarjuna and then came to hermitage of Agastya near Krishna River. He met with all the sages like Atri, Angirasa, Jaimini, Chyavana and others and on their advice visited Madanagopala temple and felt blessed. He requested the sages to explain about madanagopala charitam. They explain the whole story in detail to him. Rama. While he was on vanavasa, came to Agastyaasrama and also Jataayu who died while fighting with Ravanasura. On the request Of Agastya Sri Rama told him that he would come to his Ashrama as Gopala in the next incarnation. And accordingly, being pleased by the penance of Agastya he came to Jataprolu as Madanagopala. Indeed, a beautiful story delights the hearts of Sahridayas at every shloka[4].

I appreciate the rigorous efforts of Dr K. Varalakshmi, Deputy Director of the academy. She made a thorough research on the life of Krishnakavi and prepared a very comprehensive foreword that could be useful for further research on the contributions of Samsthanas in Telangana. She collected all the evidences of History of Samsthanams and particularly here the history of the temple of Sri Madanagopala. She prepared the shlokasuchi in alphabetical order and also given the list of Subhashitas in her Prastavana. I am pleased very much and

---

भविष्यति जगत्ख्यातं नामास्त्येतज्जगत्पतेः । जटायुक्षेत्रमेतद्धि त्वदाश्रमगतं मुने ।
पवित्रं परमं सर्वजगत्पूज्यं भविष्यति ।। Madanagopalamahatmyam VIII- 56, 57

[4] We have given the details of Sri Krishnakavi in our previous books Raghunathavijayachampu, Srinivasavilasa champu akd Kartikotsava dipika published by us from Sanskrit Academy.

 In Public domain. Digitization Muthulakshmi Research Academy

congratulate Dr K. Varalaksmi and wish her to bring some more critical studies based on the rare Sanskrit works.

I thank all my colleagues for helping me to bring out this book under the reprinting of rare books in Ashtadashi scheme.

I thank another deputy director Dr V. Subrahmanyam (presently on deputation in Pune) for his continuous help in the publication of Academy and congratulations to Dr. K. V. Suryaprakash senior research assistant. My thanks to Dr Joshi Santosh Kumar research assistant in the academy. I bless my young and sincere research scholar Mr Joshi Bharadwaj who made this book ready for publication.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Gayatri Murali Krishna Registrar I/c Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi narayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Madhukeshwar Director, central schemes in CSU Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

तेलङ्गाणाराज्यसंस्थानानि

तेलङ्गाणाराज्ये यानि गद्वाल-वनपर्ति-जटप्रोलु-दोमकोण्ड-पाल्वञ्च-पापन्नपेट-अमरचिन्तात्मकूरु-नारायणपुरं राजापेट-बोरवेल्लि-मुनगाल इत्यादीनि प्रमुखसंस्थानानि आसन् तेषु अन्यतमे जटप्रोलुसंस्थाने मदनगोपालदेवालयः अस्ति। तद्दिव्यक्षेत्रमधिकृत्य विरचितं गीर्वाणवाङ्मयमेव मदनगोपालमाहात्म्यम् इति पद्यकाव्यम्। जटप्रोलुसंस्थानशासकस्य सुरभिवेङ्कटजगन्नाथस्य प्रेरणया होसदुर्गं कृष्णमाचार्यः लक्ष्मीनृसिंहविलासचम्पूं मदनगोपालमाहात्म्यञ्च व्यरचयत्।

जटप्रोलुसंस्थानम् - कोल्लापुरसंस्थानम्

एतत् संस्थानं तेलङ्गाणाराज्यस्थे महबूबनगरमण्डले अन्तर्भवति। संस्थानमिदं प्राक् विजयनगरस्य तदनु निजामसंस्थानस्य सामन्तराज्यम् आसीत्। अर्वाचीनकाले कोल्लापुरं राजधानीत्वेन अङ्गीकृतमित्यतः कोल्लापुरसंस्थानमिति प्रख्यातिं गतम्।

जटप्रोलुसंस्थानेतिहासः

तूमाटिदोणप्पवर्यः जटप्रोलुसंस्थानस्य शासकानामितिहासं साहित्यपोषणञ्च विस्तरेण स्वग्रन्थे अलिखत्। जटप्रोलुसंस्थानाधीशेषु अन्यतमः सुरभिमाधवरायः। अयं चन्द्रिकापरिणयः इति तेलुगुप्रबन्धं रचितवान्। स्वरचनायां सः 19-75 श्लोकेषु स्ववंशवर्णनं चकार। चन्द्रिकापरिणयः इति तेलुगुप्रबन्धकाव्यस्य उपोद्घाते केशवपन्तुल नरसिंहशास्त्री विस्तरेण जटप्रोलुसंस्थानेतिहासं व्यरचयत्। अनेन वर्णनेन वेलुगोडु राचकोण्ड जटप्रोलु वंशानां परम्परां ज्ञातुं शक्यते। विष्णुपादोद्भवायाः पद्मनायकशाखायाः द्विसप्ततिगोत्रयुतराजवेलमवर्गे अन्तर्भवन्ति जटोप्रोलुसंस्थानाधीशाः। सुरभिः इति जटप्रोलुशासकानां गृहनाम वर्तते। रेचेर्लगोत्रोद्भवाश्च। संस्थानस्य त्रिंशत् शासकाः आसन्। सप्त शतस्य वत्सराणां पालनम् शासकैः कृतम्। कञ्चिकवाट-चूरकारः पञ्चपाण्ड्यदलविभाळ, खड्गनारायणः काकतीयस्थापनाचार्य इति बिरुदाञ्चिताः इमे शासकाः। आदौ विजयनगरसाम्राज्यस्य तदनु

In Public domain. Digitization Muthulakshmi Research Academy

निजामसंस्थानस्य च सामन्तराज्यमासीत् जटप्रोलुसंस्थानम्। संस्थानस्य मुख्यशासकानां सङ्क्षिप्तं विवरणं परिशील्यते।

वंशमूलपूरुषः चेव्विरेड्डि बेतालनायुडु (1195-1208) वंशस्यास्य मूलपुरुषः बेतालनायुडु इति प्रथितः चेविरेड्डिः। वेङ्कटगिरिः नूजिवीडु बोब्बिलिसंस्थानपालकानामपि मूलपुरुषः अयमेव इति इतिहास-विदामभिप्रायः। चेविरेड्डिः काकतीयचक्रवर्तिनः गणपतिरुद्रदेवस्य (क्रि.श. 1199-1262) समकालिकः।

सर्वज्ञसिङ्गभूपालः (1405-1475) अयं राजकविः वंशस्यास्य दशमपूरुषः। रसार्णवसुधाकरः सङ्गीतसुधाकरः इत्यादि शास्त्रग्रन्थाः, कन्दर्पसम्भवम् इति भाणः कुवलयावलिः इति नाटिका इत्यादयः अस्य संस्कृतरचनाश्चेति ज्ञायते।

कुमारमादानायुडु – मदनगोपालस्वामिदेवालयनिर्माता - अयं शासकः **क्रि.श. 1527** तमे वर्षे आनेगोन्दि अलिय रामदेवरायतः जटप्रोलुसंस्थानस्य अधिकारसुस्थिरतां प्राप्य विजयनगरसाम्राज्यस्य सामन्तराजः बभूव। जटप्रोलुसंस्थाने मदनगोपालस्वामिदेवालयं निर्माय मदनगोपालविग्रहप्रतिष्ठापनं कारयित्वा पक्षोत्सवब्रह्मोत्सवादिकार्यक्रमान् आयोजयति स्म इति केशवपन्तुल नरसिंहशास्त्री चन्द्रिकापरिणयस्य तेलुगुप्रबन्धस्य उपोद्घाते (क्रि.श.1982) व्यरचयत्। अन्यस्मिन् ग्रन्थे तु शासकोऽयं केवलं देवालयस्य पुनरुद्धरणं चकार इति उल्लिखितम्। अस्यैव देवालयस्य मदनगोपालस्वामिनः आविर्भावं मदनगोपालमाहात्म्यमिति पद्यकाव्ये होसदुर्गं कृष्णमाचार्यः सुन्दरपदगुम्फनेन पुराणशैल्या वर्णितवान्।

<u>मदनगोपालस्वामिदेवालयः</u> –

पालमूरुजिल्ला देवालयालु इति कविपण्डितेन कपिलवायि लिङ्गमूर्तिना विरचिते पुस्तके प्रस्तुतेषु देवालयेषु अन्यतमो वर्तते मदनगोपाल-स्वामिदेवालयः। पुस्तकस्यास्य आधारेण वल्लभरायः इति कश्चन शासकः निर्मितवान् इमं देवालयम् इति। तस्य विवरणं न ज्ञायते इति। जटप्रोलु जटायुक्षेत्रमिति पुराणसाहित्ये व्यवह्रियते। भविष्योत्तरपुराणे विष्णुरहस्यखण्डे मदनगोपालमाहात्म्यं प्रोक्तमिति मदनगोपालमाहात्म्यम् इति काव्ये

उल्लिखितम्। देवालयोऽयं दुर्गे विराजते। उपदेवालयं कृष्णानदी प्रवहति। श्रीकृष्णः रुक्मिणीसत्यभामासमेतोऽस्ति। गौः पुन्नागवृक्षश्च कृष्णविग्रहस्य पृष्ठतः विराजेते इति विशेषः। रुक्मिणीसत्यभामासहितश्चेदेव श्रीकृष्णः मदनगोपाल इति व्यवह्रियते इति उच्यते। जटप्रोलुसंस्थानचिह्नं मदनगोपालदेवालय-गोपुरचित्रसहितमस्तीति विशेषः।

माधवरायः– चन्द्रिकापरिणयकर्ता (क्रि.श. 1530-1600) - चेन्नाम्बा मुम्मडि मल्लभूपालदम्पत्योः रामराजः मल्लनृपतिः माधवरायश्चेति त्रीणि अपत्यानि। मल्लभूपालपुत्रः माधवरायः एव चन्द्रिकापरिणयः इति तेलुगुप्रबन्धस्य कर्त्ता। प्रबन्धस्यादौ कविः स्ववंशस्य वर्णनं चकार। सिङ्गपट्टणक्षेत्रे नृसिंहसागरः इति तटाकं मञ्चालकट्टग्रामे माधवस्वामिदेवालयं जटप्रोलुनगरे शिवालयञ्च निर्मापितवानयं राजकविः। एतस्य शासनकालस्य अनन्तरं जटप्रोलुसंस्थानं निजामसंस्थानान्तर्गतं जातम्।

सुरभि लक्ष्मारायबहद्दरः- अस्य पालनावसाने राजधानी जटप्रोलुतः कोल्लापुरे (क्रि.श. 1840) स्थानान्तरं जाता। **सुरभि लक्ष्मीजगन्नाथरायः (फसली 1260-1263 क्रि.श. 1851-1884)** निजामप्रभोः राजा बहद्दरु निजां नवाजवन्त इति बिरुदैः सत्कृतोऽयं शासकः। **सुरभि श्री राजा वेङ्कटलक्ष्मारावुबहद्दरु** - लक्ष्मीजगन्नाथरायस्य दत्तपुत्रोऽयं क्रि.श. 1884 वर्षात् जटप्रोलुसंस्थानं शशास। **राणी वेङ्कटरत्नमाम्बा** - राजावेङ्कटलक्ष्मारावस्य धर्मपत्नीयं पत्युः मरणानन्तरं संस्थानं किञ्चन कालं यावत् शशास।

श्रीराजा सुरभि वेङ्कटजगन्नाथरावुबहद्दरु – मदनगोपालमाहात्म्यम् कृतिभर्ता

अस्य शासनकाले एव संस्थानं भारते विलीनं जातम्। वेङ्कटजगन्नाथरावस्य प्रेरणयैव होसदुर्गं कृष्णमाचार्यः लक्ष्मीनृसिंहविलासचम्पूं मदनगोपालमाहात्म्यमिति कृतिद्वयं गीर्वाणभाषया व्यरचयदिति तूमाटिदोणप्प-वर्यः आन्ध्रसंस्थानमुलु साहित्यपोषण इति स्वग्रन्थे उल्लिखितवान्। केशवपन्तुल नरसिंहशास्त्री अपि चन्द्रिकापरिणयप्रबन्धे वेङ्कटजगन्नाथरावुबहद्दरुः एव मदनगोपालमाहात्म्यम् इति काव्यस्य कृतिभर्त्ता इति उल्लिलेख।

जटप्रोलुसंस्थानास्य कविपण्डिताः

सर्वज्ञसिङ्गभूपालस्य शासनकालादारभ्य अन्तिमशासकस्य कालपर्यन्तं जटप्रोलुसंस्थानेन साहित्यपोषणं निराटङ्कं कृतमस्ति।

In Public domain. Digitization Muthulakshmi Research Academy

एलकूचिबालसरस्वतिः (क्रि.श.1610-1670) – सुरभिवंश-कूटस्थस्य पेद्दमहीपतेः वंशान्वये तृतीयपूरुषः मुम्मडिमल्लभूपालः महामहोपाध्यायः एलकूचिबालसरस्वतेः आन्ध्रीकृतस्य सुभाषितत्रिशतेः कृतिभर्त्तास्ति। नीतिशतके सुरभिमल्ला नीतिवाचस्पती इति शृङ्गारशतके सुरभिमल्ला माननीमन्मथा इति वैराग्यशतके सुरभिमल्ला वैदुषीभूषणा इति मकुटोपेतास्ति तेलुगुसुभाषितत्रिशती। **चिन्तलपल्लि गोपालमन्त्री** (क्रि.श. 1700) आर्याशतकं संस्कृतेन विरचय्य संस्थाने सम्माननं प्राप्तवान् इति। **अक्षिन्तल सुब्बाशास्त्री** (1807-1871) काश्यां सर्वशास्त्राणि अधीत्य ब्रह्मसूत्रभाष्यस्य भाष्यार्थरत्नमाला इति व्याख्यानं विरचय्य संस्थानस्य सम्माननं प्राप्नोत्। **अक्षिन्तल सिङ्गरशास्त्री** अक्षिन्तल सुब्बाशास्त्रिणः द्वैतीयीकः नन्दनः अयं अन्नपूर्णाष्टकं द्वादशमञ्जरीं भास्करखण्डं श्रीशैलमल्लिकार्जुनरत्न-पञ्चकमित्यादिरचनाः चकार। वेङ्कटगिरिगद्वालवनपर्तिआत्मकूरुसंस्थानेषु सम्माननं प्राप्नोत्। **कविकण्ठीरवकृष्णमाचार्यः** (क्रि.श.1835) संस्थानास्थान-पण्डितोऽयं संस्कृतेन निरोष्ठ्यरामायणं व्यरचयत्। **कृष्णमाचार्यः** (क्रि.श. 1875) नृसिंहविलासः इति आन्ध्रप्रबन्धं विरचय्य जटप्रोलुपालकाय सुरभि वेङ्कटजगन्नाथाय समर्पितवानयं कविः।

कवितार्किकसिंहमञ्चालकट्टगोविन्दाचार्यः तर्कालङ्कारव्याकरणवेदान्त-मीमांसादिशास्त्राणि तिरुपतौ कपिस्थलं देशिकाचार्यस्य कण्ठीरवशास्त्रिणः अन्येषां विदुषां सन्निधौ अधीत्य तर्कालङ्कारशास्त्राध्यापनं चकारायं कविः। **वैयाकरणगजकण्ठीरव युणयवल्लि कृष्णमाचार्यः** व्याकरणशास्त्रपारङ्गतोऽयं कविः अष्टप्रासरामशतकं निरोष्ठ्यकृष्णशतकं जातकचन्द्रिकव्याख्यां रसज्ञानानन्दं श्रीकृष्णचम्पूञ्चेति ग्रन्थान् व्यरचयत्। **वेल्लाल सदाशिवशास्त्री** (1861-1926) अक्षिन्तल सुब्बादीक्षितस्य नप्तायं काशीपण्डितस्य मानवल्लि गङ्गाधरशास्त्रिणः शिष्यः। तर्कव्याकरणालङ्कारादिशास्त्रेषु पारङ्गतः। गद्वालबोब्बिलिवेङ्कट-गिरीत्यादिषु संस्थानेषु प्राप्तसम्मानः। राजा सुरभि लक्ष्मारायबहद्दरुप्रार्थनया सुरभिमाधवरायविरचितस्य चन्द्रिकापरिणयप्रबन्धस्य व्याख्यानं व्यरचयत्। काव्यालङ्कारसङ्ग्रहविमर्शनम् आन्ध्रदशरूपकविमर्शनम् वीरभद्रीयखण्डनम् वेलुगोटिवारि वंशचरित्रम् सुरभिवंशचरित्रम् कण्ठीरवचरित्रम् रामचन्द्रचरित्रम् नामिरेड्डिचरित्रम् यतिनिन्दानिराकरणम् रामानुजगोपालविजयञ्चेति नैकग्रन्थान् रचयामास।

In Public domain. Digitization Muthulakshmi Research Academy

अवधानं शेषशास्त्री वेल्लालसदाशिवशास्त्रिणा सह चन्द्रिकापरिणय-व्याख्यां सुरभिवंशचरित्रं काव्यालङ्कारसङ्ग्रहविवरणञ्च व्यरचयत्।

श्रीधरकृष्णशास्त्री - मञ्चालकट्टवास्तव्योऽयं कविः श्रीराममन्दहासः इति काव्यं व्यरचयत्।

होसदुर्गं कृष्णमाचार्यः

(क्रि.श.1839-1915) (क्रि.श.1884-1915 परकालपीठाधिपत्यम्)

सुरभिवेङ्कटजगन्नाथरावस्य आश्रितोऽयं कविः राज्ञः तस्य प्रेरणया लक्ष्मीनृसिंहविलासचम्पूं मदनगोपालमाहात्म्यम् इति काव्यद्वयं संस्कृतेन व्यरचयत्। नैकसंस्थानेषु प्राप्तसम्मानः शताधिकग्रन्थकर्ता च। कवेरस्य रघुनाथविजयचम्पूः, श्रीनिवासविलासचम्पूः, उत्तररङ्गमाहात्म्यम्, कार्तिकोत्सवदीपिकेत्यादि तेलुगुलिप्या मुद्रितानि अस्माभिः प्रकाशितानि। एतेषां काव्यानां प्रस्तावनायां कृष्णमाचार्यकवेः जीवनचरितं, शताधिककाव्यानां सूची इत्यादयः अस्माभिः सप्रमाणम् उल्लिखिताः।

मदनगोपालमाहात्म्यम् – रचनाकालः – कविजीवनकालः -

क्रि.श.1840 वर्षतः – क्रि.श. 1915 वर्षपर्यन्तमिति ज्ञायते। परकालाश्रमपीठाधिपत्यं क्रि.श.1885 तमे वर्षे कृष्णमाचार्येण स्वीकृतम्। काव्ये पुष्पिकायां कालस्य उल्लेखः कविना न कृत इत्यतः अस्याः कृतेः कालः क्रि.श.1860-1884 वर्षाणां मध्ये स्यादिति अनुमातुं शक्यते। द्वादशाध्यायात्मकं 537 श्लोकात्मकञ्चास्ति काव्यमिदम्। जटायुषः पक्षः अस्मिन् स्थले निपतितमिति हेतोः श्रीरामः तस्य स्मृतिचिह्नरूपेण जटेश्वरलिङ्गप्रतिष्ठापनं चकार इति।

कथासारः -

पाण्ड्ययात्राप्रसङ्गो नाम प्रथमोऽध्यायः– 55 श्लोकाः। ऋषय ऊचुः इति व्यासप्रोक्तपुराणशैल्या कविः काव्यमारभते। भागवतश्रवणानन्तरं पाण्ड्यनृपतिः किमकरोदिति ऋषयः यदा पप्रच्छुः तदा सूतः काश्यपप्रोक्तं पाण्ड्यस्याख्यानं श्रावयामास। द्वारकामधुरादीनि द्रष्टुमुत्सुकः पाण्ड्यनृपतिः राज्यभारं सुनीतिर्नाम्नि मन्त्रिणि निधाय दारापुत्रान् दैवज्ञान् पुरोहितान् आदाय उत्तरदिशं प्रस्थितः। कवेरजातीर्थे स्नात्वा श्रीरङ्गं प्राविशत्। तत्र रङ्गनाथदर्शनं

In Public domain. Digitization Muthulakshmi Research Academy

चकार। काञ्च्यां द्विरदाचले वरदं देवं संवीक्ष्य अष्टादश क्षेत्राणि अपि ददर्श। यदिगिरिसंस्थितं नारायणम् अभ्यर्च्य कल्याणसरसि स्नात्वा आदिवराहं दृष्ट्वा नृसिंहगिरिमारुह्य नरसिंहं ददर्श। रथेन वेङ्कटाचलं गत्वा गोविन्दं संसेव्य स्वामिपुष्करिणीतीर्थे स्नात्वा श्रीनिवासं ददर्श। उत्तरां दिशमुद्दिश्य पाण्ड्यनृपतिः जगाम। महारण्यं विलोक्य योजनानि बहूनि व्यतीयाय। गरुडाचलवेदाद्रिप्रान्ते नरसिंहं प्रणम्य पुरतः गत्वा श्रीशैले मल्लिकार्जुनं समीक्ष्य पश्चिमां दिशम् उद्दिश्य प्रस्थितः। योजनत्रयम् अतीत्य कृष्णां प्राप्तः। तुङ्गाभद्रावेणीभीमरथी-भवनाशिनीदुग्धनदीत्यादिभिः षड्भिः नदीभिः सङ्गतासीत् कृष्णा। तत्र स्नात्वा अग्रे गत्वा चक्रतीर्थेऽपि स्नात्वा अगस्त्याश्रमं प्रविश्य अगस्त्येन प्रतिष्ठापितं शङ्करं वीक्ष्य गव्यूतिमात्रं पन्थानम् अतिक्रम्य वनं किञ्चित् प्रविवेश।

भगवद्दर्शनं नाम द्वितीयोऽध्यायः – 42 श्लोकाः। पाण्ड्यः तद्वनं प्रविश्य कृष्णानदीजले स्नात्वा शुभशकुनानि संलक्ष्य दिव्यदर्शनम् आशास्य अविदूरे दिव्यदुन्दुभिनिस्वनं श्रुत्वा तद्दिशि प्रस्थितः। सूर्यसङ्काशं दिव्यविमानं ददर्श। उपविमानं वसिष्ठं वामदेवं कृष्णद्वैपायनं व्याघ्रपादं कण्वं ऋष्यश्रृङ्गं रोमशं जाबालिं अत्रिं पुलहं क्रतुं अङ्गिरसं कपिलं जैमिनिं च्यवनं अन्यान् मुनींश्च राजा तत्र ददर्श। ते मुनयः प्रणमतः राज्ञः कुशलं पप्रच्छुः। तदाज्ञया विमानं प्रविश्य मनोहरं बालवेणुगोपं ददर्श।

श्रीरामागस्त्याश्रमप्रवेशकथनं नाम तृतीयोऽध्यायः–44 श्लोकाः। पाण्ड्यनृपः भगवानेष गोपालः कस्य तपसाऽत्र आविर्भूत इति मुनीन् पप्रच्छ। वेणुगोपालचरितं वक्तुमारभत मुनिप्रचोदितः व्यासः। अयोध्यानगर्यां दशरथो नाम राजा बभूव। तस्य तिस्रः राज्ञ्यः। ताभ्यः चतुरः पुत्रान् प्राप स नृपतिः। रामः लक्ष्मणः भरतः शत्रुघ्नश्च। रामं यौवराज्ये अभिषेक्तुमैच्छत् राजा। तदा कैकेयी दत्तवरा रामस्य विवासनं भरतस्याभिषेचनम् अयाचत। पितृवाक्यपरिपालकः रामः सह सीतया लक्ष्मणेन च वनं जगाम। अगस्त्याश्रमं प्रविश्य तदातिथ्यं स्वीकृत्य ऐन्द्रं कोदण्डं विमलत्सरुं खड्गं शुभौ चाक्षयतूणीरौ रक्षसां वधार्थं अगत्स्यात् जग्राह। प्रयाणम् अनुवर्त्तयितुम् अगस्त्याज्ञां ययाच रामः।

चतुर्थोऽध्यायः– 48 श्लोकाः। मम काचित् अभ्यर्थना त्वया पूरणीया चेति अगस्त्यः रामं प्रार्थयामास। इतो दक्षिणतो दूरे श्रीमत्सिंहवटाभिधं क्षेत्रं

नरसिंहाधिष्ठितमस्ति। तस्मात् अद्यर्धयोजने दक्षिणस्यां दिशि कृष्णागोदावरीमध्ये श्रीशैलस्यापि पश्चिमे उद्देशे मम आश्रमपदमस्ति। मम अतीव प्रियं स्थानमस्ति। सप्तनदीसङ्गमस्थानमस्ति तत् अगस्त्यक्षेत्रमिति विख्यातम्। तदन्तरे पश्चिमायां दिशि गव्यूतिमात्रतः जटायुषः क्षेत्रं कृष्णाया उत्तरे तटे विभाति। निर्मलाख्या नदी तत्र प्रवहते। तत्क्षेत्रे वसन् माम् अनुगृह्णीष्व। अपिच तव पितुः सख्युः जटायोरपि प्रियं क्षेत्रमतः मम मनोरथं पूरय इति अगस्त्यः रामं प्रार्थयामास। वनवासकालावधेः परिसमाप्त्यनन्तरं यदि अयोध्यां न प्रतिगमिष्यामि भ्राता मम भरतः विगतासुर्भविष्यति। ततः वनवासे निवृत्ते भरतं द्रष्टुं मामनुज्ञातुमर्हसीति रामः अगस्त्यं निवेदयामास। अगस्त्यः स्वाभीष्टपूरणाय पुनः रामं प्रार्थयामास। तदा श्रीरामः तत्क्षेत्रे अनेन रूपेण वासः मह्यं न रोचते। द्वापरान्ते यदुनन्दनो भविष्यामि। नन्दव्रजे गोपालकस्सन् भूभारं हरिष्यामि। तेन गोपालरूपेण तव नयनानन्दं करिष्यामीति प्रतिश्रुत्य रामः ततः निर्गत्य पञ्चवटीं विवेश।

पञ्चमोऽध्यायः– 45 श्लोकाः। पञ्चवटीं गच्छन् रामः जटायुषं नाम महाकायं गृध्रं ददर्श। रामं दृष्ट्वा वत्सेति जटायुः मधुरवाणीं व्याजहार। पितुः सखायं तं ववन्दे रामः। जटायुः अस्मिने वने सुसुखं वस इति रामम् उवाच। तद्वचनं श्रुत्वा रामः पञ्चवट्यामुवास। कदाचित् तत्र मायारूपिणी शूर्पणखा सम्प्राप्ता। रामाज्ञया लक्ष्मणः तत्कर्णनासं चिच्छेद। तया नुन्नाः दूषणत्रिशिरो-मुख्या राक्षसाः रामम् अभ्ययूः। खरादीनां राक्षसानां सहस्राणि चतुर्दश रामो निन्ये यमालयम्। शूर्पणखाप्रचोदितः रावणः छलेन सीतां जहार। सीताम् अपहृत्य लङ्कां नयन्तं रावणं प्रतिरोद्धुं प्रायतत जटायुः। परं प्राणत्यागं चकार स महामनाः। सीताम् अन्विष्यन् रामः चरमदशापन्नं जटायुषं विलोक्य वरयाचनाय प्रचोदयामास। इतो दक्षिणतः अगस्त्याश्रममध्यगे मदाश्रमे सदावासं कृत्वा मामनुगृह्णीष्वेति जटायुः सम्प्रार्थ्य विगतप्राणः सञ्जातः। रामः तस्यान्त्येष्टिं चकार। ततः सुग्रीवस्य मैत्रीं हनूमतः सहयोगेन प्राप्य सेतुं निर्माय लङ्कां गत्वा युद्धे रावणं निहत्य अग्निपुनीतां सीतां प्राप्य विभीषणं अभिषिच्य पुष्पकमारुह्य आयोध्यां प्राप्य भरतमनुगृह्य शुभे मुहूर्त्ते अभिषिक्तस्सन् रामः चिरं शशास मेदिनीम्।

षष्ठोऽध्यायः–40 श्लोकाः। दशवर्षसहस्राणि दशवर्षशतानि च राज्यं कृत्वा रामः प्राप स्वधाम। द्वापरान्ते हरिः वसुदेवपत्न्याः देवक्याः गर्भे प्रादुरास।

In Public domain. Digitization Muthulakshmi Research Academy

कंसभीतः वसुदेवः शिशुं नन्दव्रजे न्यधात्। कंसप्रेषितान् राक्षसान् देवकीनन्दनः कृष्णः जघान। सः विविधलीलाभिः गोपगोपीः प्रीणयन् गोकुले उवास। रुक्मिणीसत्यभामामित्रविन्दादिभिः पत्नीभिः ससुखं विहरन् नरकासुरं जित्वा राजकन्यास्सहस्राणि पाणौकृत्य भूमेः भारायमाणान् धार्तराष्ट्रान् सपाण्डवः निहत्य परं धाम जगाम। रामस्य वरदानम् अनुस्मरन् देवं ध्यायं ध्यायम् अगस्त्यः निजाश्रमपदे बहूनि वर्षाणि निन्ये। वासुदेवः भुवं मुक्त्वा स्वधाम जगामेति श्रुत्वा मुनिः दुःखितोऽभूत्। मुहुः मुहुः विलपतः मुनेः आश्रमपदं प्राप नारदः। अगस्त्यः नारदं विष्टरतले उपवेशितवान्।

सप्तमोऽध्यायः– 53 श्लोकाः। नारदोपदेशेन अगस्त्यः शिवमुद्दिश्य सप्त दिनानि यावत् तपः तेपे। प्रसन्नेन शिवेन रामतारकः मन्त्रः उपदिष्टः सूचितश्च यत् जटायुषः क्षेत्रे मन्त्रं जपन् राममुद्दिश्य तपश्चरणीयम्। एकस्मिन्नेव अहनि जटायुषः क्षेत्रे कृततपसा अभीष्टं सिद्ध्यति यत् अन्यक्षेत्रे वर्षाणां सहस्रेणापि नापि सिद्ध्यति। शिवोपदेशं पालयन् अगस्त्यः जटायुषः क्षेत्रस्थं वनं प्राप। **सप्तदिनानि नीलकण्ठम् उद्दिश्य तपः चर। प्रीतः शिवः रामतारकं मन्त्रं उपदेक्ष्यति। पुनः सप्तदिनानि जटायुषः क्षेत्रे तपश्चर।**

अष्टमोऽध्यायः– 44 श्लोकाः। अगस्त्येन कृतेन तपसा प्रसन्नः भगवान् विष्णुः प्रादुरासीत्। दिव्यदुन्दुभिनादेन अगस्त्यः उत्थाय दिव्यं ज्योतिरपश्यत्। क्रमशः तत् दिव्यं तेजः भगवान् विष्णुरिति अवगत्य हर्षातिरेकं प्राप मुनिः। भगवद्दिव्यदर्शनं सुचारुभिः श्लोकैः कविः वर्णयामास।

नवमोऽध्यायः– 67 श्लोकाः। अगस्त्यः भगवच्चरणौ भक्त्या ननाम। भगवान् मृदुकरेण तं स्पृष्टवान्। तेन स्पर्शेण मुनिः पुलकितगात्रोऽभूत्। बालगोपालवेषेण त्वदाश्रमे निवसिष्यामीति भगवता पूर्वं दत्तं वरमनुस्मारयन् मुनिः स्वाभीष्टं पूरयेति प्रार्थयामास। साम्प्रतं प्रतिमामेतां गोपवेषमनोहराम् गृहाण। त्वं नित्यमेनां समर्चय इति भगवान् विष्णुः अगस्त्यमन्वग्रहीत्। श्रीभूमीभ्यां समन्विताम् प्रतिमामादाय मुनिः सोऽयं मदनगोपालो मया लब्धो हरिश्चिरात् इति सन्तुष्टान्तरङ्गोऽभवत्। हरिवल्लभा लक्ष्मीः जटायुषः क्षेत्रे प्रतिमैषा प्रतिष्ठापनीया यतः मत्कृते त्यक्तजीवनः जटायुः। मुने जटायुक्षेत्रमेतद्धि त्वदाश्रमगतं सर्वजगत्पूज्यं भविष्यतीति तमब्रवीत्। तद्वचनमनुसृत्य अगस्त्यः दिव्यमङ्गलविग्रहं प्रतिष्ठापयामास।

दशमोऽध्यायः– 33 श्लोकाः। इत्थं वेणुगोपालमाहात्म्यं व्यासमुखात् श्रुत्वा परमानन्दमवाप पाण्ड्यराजेन्द्रः। तदुपदेशमनुसृत्य तद्दिव्यक्षेत्रे स्थिरवासं कर्तुं मतिं चक्रे।

एकादशोऽध्यायः– 38 श्लोकाः। अथ पाण्ड्यराजः सिंहवटाभिधम् क्षेत्रं तत्र यो व्यक्तिमापन्नो नरसिंहो जगत्पतिः तदाविर्भावकारणं वद इति व्यासं प्रार्थयामास। व्यासः सिंङवटाभिधक्षेत्रे नरसिंहस्य आविर्भावं श्रावयामास। सिंहवटो नाम वटुः कश्चन अहोबिलक्षेत्रे नरसिंहं सेवितुं दक्षिणाभिमुखं प्रतस्थे। जटायुषः क्षेत्राद् अध्यर्धयोजने महारण्ये स्थूलमुपलं वीक्ष्य यथा प्रह्लादस्य प्रार्थनामङ्गीकृत्य स्तम्भे प्रादुरासीत् तथा उपलेऽस्मिन्नपि स्वकं रूपं प्रदर्शय इति भक्तिमेदुरमनसा प्रार्थयामास। तद्भक्त्या प्रीतः भगवान् स्वं रूपं प्रदर्शयामास। तद्वीक्ष्य भीतः सिंहवटः तमुग्ररूपम् उपसंहर इति भगवन्तं प्रार्थयामास। तदङ्गीकृत्य शिलामिमां भक्त्या पूजय। सिंहवटक्षेत्रमिति इदं जगत्पूज्यं भविष्यतीति उक्त्वा तां शिलां प्राविशत् नरसिंहः । सिंहवटक्षेत्रमाहात्म्यं निशम्य मुनिम् अभिपूज्य पाण्ड्यराजः मदनगोपालस्य माध्याह्निकीं पूजां विधाय धन्यतामाप।

द्वादशोऽध्यायः– 16 श्लोकाः। अथ स्वपुत्रं अभिषिच्य राज्यं प्रति तं प्रेषयित्वा सपत्नीकः पाण्ड्यनृपतिः जटायुषः क्षेत्रे मदनगोपालं सेवमानः स्वजीवनं सार्थकं चकार। इति मदनगोपालमाहात्म्यं विरचय्य काव्यफलश्रुतिमपि विलिख्य कविः विरराम।

<u>काव्यतत्त्वानि – सूक्तिरत्नानि -</u>

1) अथवा महतामेष स्वभावो दुरवग्रहः ।
2) स्वगुणान् शिष्यवर्गेषु कृपया रोपयन्ति यत् ।। 2. 29 ।।
3) न जातु पृथगासीत्प्रभा चन्द्रं विना प्रभो ।।3. 38 ।।
4) रञ्जयत्यनघं रत्नं चामीकरमिव प्रभो ।। 3.39 ।।
5) नृणामास्यं पिधातुं को नु शक्नुयात् ।। 4.27 ।।
6) यदुत्साहेन संसिध्येन्नहि तच्चिन्तया क्वचित् ।
7) चिन्ता नाम महान् व्याधिर्जरयत्यञ्जसा नरम् ।। 7.3 ।।
8) आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
9) क्षिप्रमक्रियमाणस्य कालः पिबति सम्पदः ।।7. 29 ।।

In Public domain. Digitization Muthulakshmi Research Academy

निजामसंस्थानस्य च सामन्तराज्यमासीत् जटप्रोलुसंस्थानम्। संस्थानस्य मुख्यशासकानां सङ्क्षिप्तं विवरणं परिशील्यते।

वंशमूलपूरुषः चेव्विरेड्डि बेतालनायुडु (1195-1208) वंशस्यास्य मूलपुरुषः बेतालनायुडु इति प्रथितः चेविरेड्डिः। वेङ्कटगिरिः नूजिवीडु बोब्बिलिसंस्थानपालकानामपि मूलपुरुषः अयमेव इति इतिहासविदामभिप्रायः। चेविरेड्डिः काकतीयचक्रवर्तिनः गणपतिरुद्रदेवस्य (क्रि.श. 1199-1262) समकालिकः।

सर्वज्ञसिङ्गभूपालः (1405-1475) अयं राजकविः वंशस्यास्य दशमपूरुषः। रसार्णवसुधाकरः सङ्गीतसुधाकरः इत्यादि शास्त्रग्रन्थाः, कन्दर्पसम्भवम् इति भाणः कुवलयावलिः इति नाटिका इत्यादयः अस्य संस्कृतरचनाश्चेति ज्ञायते।

कुमारमादानायुडु – मदनगोपालस्वामिदेवालयनिर्माता - अयं शासकः **क्रि.श. 1527** तमे वर्षे आनेगोन्दि अलिय रामदेवरायतः जटप्रोलुसंस्थानस्य अधिकारसुस्थिरतां प्राप्य विजयनगरसाम्राज्यस्य सामन्तराजः बभूव। जटप्रोलुसंस्थाने मदनगोपालस्वामिदेवालयं निर्माय मदनगोपालविग्रहप्रतिष्ठापनं कारयित्वा पक्षोत्सवब्रह्मोत्सवादिकार्यक्रमान् आयोजयति स्म इति केशवपन्तुल नरसिंहशास्त्री चन्द्रिकापरिणयस्य तेलुगुप्रबन्धस्य उपोद्घाते (क्रि.श.1982) व्यरचयत्। अन्यस्मिन् ग्रन्थे तु शासकोऽयं केवलं देवालयस्य पुनरुद्धरणं चकार इति उल्लिखितम्। अस्यैव देवालयस्य मदनगोपालस्वामिनः आविर्भावं मदनगोपालमाहात्म्यमिति पद्यकाव्ये होसदुर्गं कृष्णमाचार्यः सुन्दरपदगुम्फनेन पुराणशैल्या वर्णितवान्।

<u>मदनगोपालस्वामिदेवालयः</u> –

पालमूरुजिल्ला देवालयालु इति कविपण्डितेन कपिलवायि लिङ्गमूर्तिना विरचिते पुस्तके प्रस्तुतेषु देवालयेषु अन्यतमो वर्तते मदनगोपालस्वामिदेवालयः। पुस्तकस्यास्य आधारेण वल्लभरायः इति कश्चन शासकः निर्मितवान् इमं देवालयम् इति। तस्य विवरणं न ज्ञायते इति। जटप्रोलु जटायुक्षेत्रमिति पुराणसाहित्ये व्यवह्रियते। भविष्योत्तरपुराणे विष्णुरहस्यखण्डे मदनगोपालमाहात्म्यं प्रोक्तमिति मदनगोपालमाहात्म्यम् इति काव्ये

उल्लिखितम्। देवालयोऽयं दुर्गे विराजते। उपदेवालयं कृष्णानदी प्रवहति। श्रीकृष्णः रुक्मिणीसत्यभामासमेतोऽस्ति। गौः पुन्नागवृक्षश्च कृष्णविग्रहस्य पृष्ठतः विराजेते इति विशेषः। रुक्मिणीसत्यभामासहितश्चेदेव श्रीकृष्णः मदनगोपाल इति व्यवह्रियते इति उच्यते। जटप्रोलुसंस्थानचिह्नं मदनगोपालदेवालय-गोपुरचित्रसहितमस्तीति विशेषः।

माधवरायः– चन्द्रिकापरिणयकर्ता (क्रि.श. 1530-1600) - चेन्नाम्बा मुम्मडि मल्लभूपालदम्पत्योः रामराजः मल्लनृपतिः माधवरायश्चेति त्रीणि अपत्यानि। मल्लभूपालपुत्रः माधवरायः एव चन्द्रिकापरिणयः इति तेलुगुप्रबन्धस्य कर्त्ता। प्रबन्धस्यादौ कविः स्ववंशस्य वर्णनं चकार। सिङ्गपट्टणक्षेत्रे नृसिंहसागरः इति तटाकं मञ्चालकट्टग्रामे माधवस्वामिदेवालयं जटप्रोलुनगरे शिवालयञ्च निर्मापितवानयं राजकविः। एतस्य शासनकालस्य अनन्तरं जटप्रोलुसंस्थानं निजामसंस्थानान्तर्गतं जातम्।

सुरभि लक्ष्मारायबहद्दरः- अस्य पालनावसाने राजधानी जटप्रोलुतः कोल्लापुरे (क्रि.श. 1840) स्थानान्तरं जाता। **सुरभि लक्ष्मीजगन्नाथरायः (फसली 1260-1263 क्रि.श. 1851-1884)** निजामप्रभोः राजा बहद्दरु निजां नवाजवन्त इति बिरुदैः सत्कृतोऽयं शासकः। **सुरभि श्री राजा वेङ्कटलक्ष्मारावुबहद्दरु** - लक्ष्मीजगन्नाथरायस्य दत्तपुत्रोऽयं क्रि.श. 1884 वर्षात् जटप्रोलुसंस्थानं शशास। **राणी वेङ्कटरत्नमाम्बा** - राजावेङ्कटलक्ष्मारावस्य धर्मपत्नीयं पत्युः मरणानन्तरं संस्थानं किञ्चन कालं यावत् शशास।

श्रीराजा सुरभि वेङ्कटजगन्नाथरावुबहद्दरु – मदनगोपालमाहात्म्यम् कृतिभर्ता

अस्य शासनकाले एव संस्थानं भारते विलीनं जातम्। वेङ्कटजगन्नाथरावस्य प्रेरणयैव होसदुर्गं कृष्णमाचार्यः लक्ष्मीनृसिंहविलासचम्पू मदनगोपालमाहात्म्यमिति कृतिद्वयं गीर्वाणभाषया व्यरचयदिति तूमाटिदोणप्प-वर्यः आन्ध्रसंस्थानमुलु साहित्यपोषण इति स्वग्रन्थे उल्लिखितवान्। केशवपन्तुल नरसिंहशास्त्री अपि चन्द्रिकापरिणयप्रबन्धे वेङ्कटजगन्नाथरावुबहद्दरुः एव मदनगोपालमाहात्म्यम् इति काव्यस्य कृतिभर्त्ता इति उल्लिलेख।

जटप्रोलुसंस्थानास्य कविपण्डिताः

सर्वज्ञसिङ्गभूपालस्य शासनकालादारभ्य अन्तिमशासकस्य कालपर्यन्तं जटप्रोलुसंस्थानेन साहित्यपोषणं निराटङ्कं कृतमस्ति।

 In Public domain. Digitization Muthulakshmi Research Academy

एलकूचिबालसरस्वतिः (क्रि.श.1610-1670) – सुरभिवंश-कूटस्थस्य पेद्दमहीपतेः वंशान्वये तृतीयपूरुषः मुम्मडिमल्लभूपालः महामहोपाध्यायः एलकूचिबालसरस्वतेः आन्ध्रीकृतस्य सुभाषितत्रिशतेः कृतिभर्त्तास्ति। नीतिशतके सुरभिमल्ला नीतिवाचस्पती इति श्रृङ्गारशतके सुरभिमल्ला माननीमन्मथा इति वैराग्यशतके सुरभिमल्ला वैदुषीभूषणा इति मकुटोपेतास्ति तेलुगुसुभाषितत्रिशती। **चिन्तलपल्लि गोपालमन्त्री** (क्रि.श. 1700) आर्याशतकं संस्कृतेन विरचय्य संस्थाने सम्माननं प्राप्तवान् इति। **अक्षिन्तल सुब्बाशास्त्री** (1807-1871) काश्यां सर्वशास्त्राणि अधीत्य ब्रह्मसूत्रभाष्यस्य भाष्यार्थरत्नमाला इति व्याख्यानं विरचय्य संस्थानस्य सम्माननं प्राप्नोत्। **अक्षिन्तल सिङ्गरशास्त्री** अक्षिन्तल सुब्बाशास्त्रिणः द्वैतीयीकः नन्दनः अयं अन्नपूर्णाष्टकं द्वादशमञ्जरीं भास्करखण्डं श्रीशैलमल्लिकार्जुनरत्न-पञ्चकमित्यादिरचनाः चकार। वेङ्कटगिरिगद्वालवनपर्तिआत्मकूरुसंस्थानेषु सम्माननं प्राप्नोत्। **कविकण्ठीरवकृष्णमाचार्यः** (क्रि.श.1835) संस्थानास्थान-पण्डितोऽयं संस्कृतेन निरोष्ठ्यरामायणं व्यरचयत्। **कृष्णमाचार्यः** (क्रि.श. 1875) नृसिंहविलासः इति आन्ध्रप्रबन्धं विरचय्य जटप्रोलुपालकाय सुरभि वेङ्कटजगन्नाथाय समर्पितवानयं कविः।

कवितार्किकसिंहमञ्चालकट्टगोविन्दाचार्यः तर्कालङ्कारव्याकरणवेदान्त-मीमांसादिशास्त्राणि तिरुपतौ कपिस्थलं देशिकाचार्यस्य कण्ठीरवशास्त्रिणः अन्येषां विदुषां सन्निधौ अधीत्य तर्कालङ्कारशास्त्राध्यापनं चकारायं कविः। **वैयाकरणगजकण्ठीरव युणयवल्लि कृष्णमाचार्यः** व्याकरणशास्त्रपारङ्गतोऽयं कविः अष्टप्रासरामशतकं निरोष्ठ्यकृष्णशतकं जातकचन्द्रिकव्याख्यां रसज्ञानानन्दं श्रीकृष्णचम्पूञ्चेति ग्रन्थान् व्यरचयत्। **वेल्लाल सदाशिवशास्त्री** (1861-1926) अक्षिन्तल सुब्बादीक्षितस्य नप्तायं काशीपण्डितस्य मानवल्लि गङ्गाधरशास्त्रिणः शिष्यः। तर्कव्याकरणालङ्कारादिशास्त्रेषु पारङ्गतः। गद्वालबोब्बिलिवेङ्कट-गिरीत्यादिषु संस्थानेषु प्राप्तसम्मानः। राजा सुरभि लक्ष्मारायबहद्दरुप्रार्थनया सुरभिमाधवरायविरचितस्य चन्द्रिकापरिणयप्रबन्धस्य व्याख्यानं व्यरचयत्। काव्यालङ्कारसङ्ग्रहविमर्शनम् आन्ध्रदशरूपकविमर्शनम् वीरभद्रीयखण्डनम् वेलुगोटिवारि वंशचरित्रम् सुरभिवंशचरित्रम् कण्ठीरवचरित्रम् रामचन्द्रचरित्रम् नामिरेड्डिचरित्रम् यतिनिन्दानिराकरणम् रामानुजगोपालविजयञ्चेति नैकग्रन्थान् रचयामास।

In Public domain. Digitization Muthulakshmi Research Academy

अवधानं शेषशास्त्री वेल्लालसदाशिवशास्त्रिणा सह चन्द्रिकापरिणय-व्याख्यां सुरभिवंशचरित्रं काव्यालङ्कारसङ्ग्रहविवरणञ्च व्यरचयत्।

श्रीधरकृष्णशास्त्री - मञ्चालकट्टवास्तव्योऽयं कविः श्रीराममन्दहासः इति काव्यं व्यरचयत्।

होसदुर्गं कृष्णमाचार्यः

(क्रि.श.1839-1915) (क्रि.श.1884-1915 परकालपीठाधिपत्यम्)

सुरभिवेङ्कटजगन्नाथरावस्य आश्रितोऽयं कविः राज्ञः तस्य प्रेरणया लक्ष्मीनृसिंहविलासचम्पूं मदनगोपालमाहात्म्यम् इति काव्यद्वयं संस्कृतेन व्यरचयत्। नैकसंस्थानेषु प्राप्तसम्मानः शताधिकग्रन्थकर्ता च। कवेरस्य रघुनाथविजयचम्पूः, श्रीनिवासविलासचम्पूः, उत्तररङ्गमाहात्म्यम्, कार्तिकोत्सवदीपिकेत्यादि तेलुगुलिप्या मुद्रितानि अस्माभिः प्रकाशितानि। एतेषां काव्यानां प्रस्तावनायां कृष्णमाचार्यकवेः जीवनचरितं, शताधिककाव्यानां सूची इत्यादयः अस्माभिः सप्रमाणम् उल्लिखिताः।

मदनगोपालमाहात्म्यम् – रचनाकालः – कविजीवनकालः -

क्रि.श.1840 वर्षतः – क्रि.श. 1915 वर्षपर्यन्तमिति ज्ञायते। परकालाश्रमपीठाधिपत्यं क्रि.श.1885 तमे वर्षे कृष्णमाचार्येण स्वीकृतम्। काव्ये पुष्पिकायां कालस्य उल्लेखः कविना न कृत इत्यतः अस्याः कृतेः कालः क्रि.श.1860-1884 वर्षाणां मध्ये स्यादिति अनुमातुं शक्यते। द्वादशाध्यायात्मकं 537 श्लोकात्मकञ्चास्ति काव्यमिदम्। जटायुषः पक्षः अस्मिन् स्थले निपतितमिति हेतोः श्रीरामः तस्य स्मृतिचिह्नरूपेण जटेश्वरलिङ्गप्रतिष्ठापनं चकार इति।

कथासारः -

पाण्ड्ययात्राप्रसङ्गो नाम प्रथमोऽध्यायः– 55 श्लोकाः। ऋषय ऊचुः इति व्यासप्रोक्तपुराणशैल्या कविः काव्यमारभते। भागवतश्रवणानन्तरं पाण्ड्यनृपतिः किमकरोदिति ऋषयः यदा पप्रच्छुः तदा सूतः काश्यपप्रोक्तं पाण्ड्यस्याख्यानं श्रावयामास। द्वारकामधुरादीनि द्रष्टुमुत्सुकः पाण्ड्यनृपतिः राज्यभारं सुनीतिर्नाम्नि मन्त्रिणि निधाय दारापुत्रान् दैवज्ञान् पुरोहितान् आदाय उत्तरदिशं प्रस्थितः। कवेरजातीर्थे स्नात्वा श्रीरङ्गं प्राविशत्। तत्र रङ्गनाथदर्शनं

In Public domain. Digitization Muthulakshmi Research Academy

चकार। काञ्च्यां द्विरदाचले वरदं देवं संवीक्ष्य अष्टादश क्षेत्राणि अपि ददर्श। यदिगिरिसंस्थितं नारायणम् अभ्यर्च्य कल्याणसरसि स्नात्वा आदिवराहं दृष्ट्वा नृसिंहगिरिमारुह्य नरसिंहं ददर्श। रथेन वेङ्कटाचलं गत्वा गोविन्दं संसेव्य स्वामिपुष्करिणीतीर्थे स्नात्वा श्रीनिवासं ददर्श। उत्तरां दिशमुद्दिश्य पाण्ड्यनृपतिः जगाम। महारण्यं विलोक्य योजनानि बहूनि व्यतीयाय। गरुडाचलवेदाद्रिप्रान्ते नरसिंहं प्रणम्य पुरतः गत्वा श्रीशैले मल्लिकार्जुनं समीक्ष्य पश्चिमां दिशम् उद्दिश्य प्रस्थितः। योजनत्रयम् अतीत्य कृष्णां प्राप्तः। तुङ्गाभद्रावेणीभीमरथी-भवनाशिनीदुग्धनदीत्यादिभिः षड्भिः नदीभिः सङ्गतासीत् कृष्णा। तत्र स्नात्वा अग्रे गत्वा चक्रतीर्थेऽपि स्नात्वा अगस्त्याश्रमं प्रविश्य अगस्त्येन प्रतिष्ठापितं शङ्करं वीक्ष्य गव्यूतिमात्रं पन्थानम् अतिक्रम्य वनं किञ्चित् प्रविवेश।

भगवद्दर्शनं नाम द्वितीयोऽध्यायः – 42 श्लोकाः। पाण्ड्यः तद्वनं प्रविश्य कृष्णानदीजले स्नात्वा शुभशकुनानि संलक्ष्य दिव्यदर्शनम् आशास्य अविदूरे दिव्यदुन्दुभिनिस्वनं श्रुत्वा तद्दिशि प्रस्थितः। सूर्यसङ्काशं दिव्यविमानं ददर्श। उपविमानं वसिष्ठं वामदेवं कृष्णद्वैपायनं व्याघ्रपादं कण्वं ऋष्यशृङ्गं रोमशं जाबालिं अत्रिं पुलहं क्रतुं अङ्गिरसं कपिलं जैमिनिं च्यवनं अन्यान् मुनींश्च राजा तत्र ददर्श। ते मुनयः प्रणमतः राज्ञः कुशलं पप्रच्छुः। तदाज्ञया विमानं प्रविश्य मनोहरं बालवेणुगोपं ददर्श।

श्रीरामागस्त्याश्रमप्रवेशकथनं नाम तृतीयोऽध्यायः–44 श्लोकाः। पाण्ड्यनृपः भगवानेष गोपालः कस्य तपसाऽत्र आविर्भूत इति मुनीन् पप्रच्छ। वेणुगोपालचरितं वक्तुमारभत मुनिप्रचोदितः व्यासः। अयोध्यानगर्यां दशरथो नाम राजा बभूव। तस्य तिस्रः राज्यः। ताभ्यः चतुरः पुत्रान् प्राप स नृपतिः। रामः लक्ष्मणः भरतः शत्रुघ्नश्च। रामं यौवराज्ये अभिषेक्तुमैच्छत् राजा। तदा कैकेयी दत्तवरा रामस्य विवासनं भरतस्याभिषेचनम् अयाचत। पितृवाक्यपरिपालकः रामः सह सीतया लक्ष्मणेन च वनं जगाम। अगस्त्याश्रमं प्रविश्य तदातिथ्यं स्वीकृत्य ऐन्द्रं कोदण्डं विमलत्सरुं खड्गं शुभौ चाक्षयतूणीरौ रक्षसां वधार्थं अगत्स्यात् जग्राह। प्रयाणम् अनुवर्त्तयितुम् अगस्त्याज्ञां ययाच रामः।

चतुर्थोऽध्यायः– 48 श्लोकाः। मम काचित् अभ्यर्थना त्वया पूरणीया चेति अगस्त्यः रामं प्रार्थयामास। इतो दक्षिणतो दूरे श्रीमत्सिंहवटाभिधं क्षेत्रं

नरसिंहाधिष्ठितमस्ति। तस्मात् अद्यर्धयोजने दक्षिणस्यां दिशि कृष्णागोदावरीमध्ये श्रीशैलस्यापि पश्चिमे उद्देशे मम आश्रमपदमस्ति। मम अतीव प्रियं स्थानमस्ति। सप्तनदीसङ्गमस्थानमस्ति तत् अगस्त्यक्षेत्रमिति विख्यातम्। तदन्तरे पश्चिमायां दिशि गव्यूतिमात्रतः जटायुषः क्षेत्रं कृष्णाया उत्तरे तटे विभाति। निर्मलाख्या नदी तत्र प्रवहते। तत्क्षेत्रे वसन् माम् अनुगृह्णीष्व। अपिच तव पितुः सख्युः जटायोरपि प्रियं क्षेत्रमतः मम मनोरथं पूरय इति अगस्त्यः रामं प्रार्थयामास। वनवासकालावधेः परिसमाप्त्यनन्तरं यदि अयोध्यां न प्रतिगमिष्यामि भ्राता मम भरतः विगतासुर्भविष्यति। ततः वनवासे निवृत्ते भरतं द्रष्टुं मामनुज्ञातुमर्हसीति रामः अगस्त्यं निवेदयामास। अगस्त्यः स्वाभीष्टपूरणाय पुनः रामं प्रार्थयामास। तदा श्रीरामः तत्क्षेत्रे अनेन रूपेण वासः मह्यं न रोचते। द्वापरान्ते यदुनन्दनो भविष्यामि। नन्दव्रजे गोपालकस्सन् भूभारं हरिष्यामि। तेन गोपालरूपेण तव नयनानन्दं करिष्यामीति प्रतिश्रुत्य रामः ततः निर्गत्य पञ्चवटीं विवेश।

पञ्चमोऽध्यायः– 45 श्लोकाः। पञ्चवटीं गच्छन् रामः जटायुषं नाम महाकायं गृधं ददर्श। रामं दृष्ट्वा वत्सेति जटायुः मधुरवाणीं व्याजहार। पितुः सखायं तं ववन्दे रामः। जटायुः अस्मिने वने सुसुखं वस इति रामम् उवाच। तद्वचनं श्रुत्वा रामः पञ्चवट्यामुवास। कदाचित् तत्र मायारूपिणी शूर्पणखा सम्प्राप्ता। रामाज्ञया लक्ष्मणः तत्कर्णनासं चिच्छेद। तया नुन्नाः दूषणत्रिशिरो-मुख्या राक्षसाः रामम् अभ्ययूः। खरादीनां राक्षसानां सहस्राणि चतुर्दश रामो निन्ये यमालयम्। शूर्पणखाप्रचोदितः रावणः छलेन सीतां जहार। सीताम् अपहृत्य लङ्कां नयन्तं रावणं प्रतिरोद्धुं प्रायतत जटायुः। परं प्राणत्यागं चकार स महामनाः। सीताम् अन्विष्यन् रामः चरमदशापन्नं जटायुषं विलोक्य वरयाचनाय प्रचोदयामास। इतो दक्षिणतः अगस्त्याश्रममध्यगे मदाश्रमे सदावासं कृत्वा मामनुगृह्णीष्वेति जटायुः सम्प्रार्थ्य विगतप्राणः सञ्जातः। रामः तस्यान्त्येष्टिं चकार। ततः सुग्रीवस्य मैत्रीं हनूमतः सहयोगेन प्राप्य सेतुं निर्माय लङ्कां गत्वा युद्धे रावणं निहत्य अग्निपुनीतां सीतां प्राप्य विभीषणं अभिषिच्य पुष्पकमारुह्य आयोध्यां प्राप्य भरतमनुगृह्य शुभे मुहूर्त्ते अभिषिक्तस्सन् रामः चिरं शशास मेदिनीम्।

षष्ठोऽध्यायः–40 श्लोकाः। दशवर्षसहस्राणि दशवर्षशतानि च राज्यं कृत्वा रामः प्राप स्वधाम। द्वापरान्ते हरिः वसुदेवपत्न्याः देवक्याः गर्भे प्रादुरास।

In Public domain. Digitization Muthulakshmi Research Academy

कंसभीतः वसुदेवः शिशुं नन्दव्रजे न्यधात्। कंसप्रेषितान् राक्षसान् देवकीनन्दनः कृष्णः जघान। सः विविधलीलाभिः गोपगोपीः प्रीणयन् गोकुले उवास। रुक्मिणीसत्यभामामित्रविन्दादिभिः पत्नीभिः ससुखं विहरन् नरकासुरं जित्वा राजकन्यास्सहस्राणि पाणीकृत्य भूमेः भारायमाणान् धार्तराष्ट्रान् सपाण्डवः निहत्य परं धाम जगाम। रामस्य वरदानम् अनुस्मरन् देवं ध्यायं ध्यायम् अगस्त्यः निजाश्रमपदे बहूनि वर्षाणि निन्ये। वासुदेवः भुवं मुक्त्वा स्वधाम जगामेति श्रुत्वा मुनिः दुःखितोऽभूत्। मुहुः मुहुः विलपतः मुनेः आश्रमपदं प्राप नारदः। अगस्त्यः नारदं विष्टरतले उपवेशितवान्।

सप्तमोऽध्यायः– 53 श्लोकाः। नारदोपदेशेन अगस्त्यः शिवमुद्दिश्य सप्त दिनानि यावत् तपः तेपे। प्रसन्नेन शिवेन रामतारकः मन्त्रः उपदिष्टः सूचितश्च यत् जटायुषः क्षेत्रे मन्त्रं जपन् राममुद्दिश्य तपश्चरणीयम्। एकस्मिन्नेव अहनि जटायुषः क्षेत्रे कृततपसा अभीष्टं सिद्ध्यति यत् अन्यक्षेत्रे वर्षाणां सहस्रेणापि नापि सिद्ध्यति। शिवोपदेशं पालयन् अगस्त्यः जटायुषः क्षेत्रस्थं वनं प्राप। **सप्तदिनानि नीलकण्ठम् उद्दिश्य तपः चर। प्रीतः शिवः रामतारकं मन्त्रं उपदेक्ष्यति। पुनः सप्तदिनानि जटायुषः क्षेत्रे तपश्चर।**

अष्टमोऽध्यायः– 44 श्लोकाः। अगस्त्येन कृतेन तपसा प्रसन्नः भगवान् विष्णुः प्रादुरासीत्। दिव्यदुन्दुभिनादेन अगस्त्यः उत्थाय दिव्यं ज्योतिरपश्यत्। क्रमशः तत् दिव्यं तेजः भगवान् विष्णुरिति अवगत्य हर्षातिरेकं प्राप मुनिः। भगवद्दिव्यदर्शनं सुचारुभिः श्लोकैः कविः वर्णयामास।

नवमोऽध्यायः– 67 श्लोकाः। अगस्त्यः भगवच्चरणौ भक्त्या ननाम। भगवान् मृदुकरेण तं स्पृष्टवान्। तेन स्पर्शेण मुनिः पुलकितगात्रोऽभूत्। बालगोपालवेषेण त्वदाश्रमे निवसिष्यामीति भगवता पूर्वं दत्तं वरमनुस्मारयन् मुनिः स्वाभीष्टं पूरयेति प्रार्थयामास। साम्प्रतं प्रतिमामेतां गोपवेषमनोहराम् गृहाण। त्वं नित्यमेनां समर्चय इति भगवान् विष्णुः अगस्त्यमन्वग्रहीत्। श्रीभूमीभ्यां समन्विताम् प्रतिमामादाय मुनिः सोऽयं मदनगोपालो मया लब्धो हरिश्चिरात् इति सन्तुष्टान्तरङ्गोऽभवत्। हरिवल्लभा लक्ष्मीः जटायुषः क्षेत्रे प्रतिमैषा प्रतिष्ठापनीया यतः मत्कृते त्यक्तजीवनः जटायुः। मुने जटायुक्षेत्रमेतद्धि त्वदाश्रमगतं सर्वजगत्पूज्यं भविष्यतीति तमब्रवीत्। तद्वचनमनुसृत्य अगस्त्यः दिव्यमङ्गलविग्रहं प्रतिष्ठापयामास।

दशमोऽध्यायः– 33 श्लोकाः। इत्थं वेणुगोपालमाहात्म्यं व्यासमुखात् श्रुत्वा परमानन्दमवाप पाण्ड्यराजेन्द्रः। तदुपदेशमनुसृत्य तद्दिव्यक्षेत्रे स्थिरवासं कर्तुं मतिं चक्रे।

एकादशोऽध्यायः– 38 श्लोकाः। अथ पाण्ड्यराजः सिंहवटाभिधम् क्षेत्रं तत्र यो व्यक्तिमापन्नो नरसिंहो जगत्पतिः तदाविर्भावकारणं वद इति व्यासं प्रार्थयामास। व्यासः सिंङवटाभिधक्षेत्रे नरसिंहस्य आविर्भावं श्रावयामास। सिंहवटो नाम वटुः कश्चन अहोबिलक्षेत्रे नरसिंहं सेवितुं दक्षिणाभिमुखं प्रतस्थे। जटायुषः क्षेत्राद् अध्यर्धयोजने महारण्ये स्थूलमुपलं वीक्ष्य यथा प्रह्लादस्य प्रार्थनामङ्गीकृत्य स्तम्भे प्रादुरासीत् तथा उपलेऽस्मिन्नपि स्वकं रूपं प्रदर्शय इति भक्तिमेदुरमनसा प्रार्थयामास। तद्भक्त्या प्रीतः भगवान् स्वं रूपं प्रदर्शयामास। तद्वीक्ष्य भीतः सिंहवटः तमुग्ररूपम् उपसंहर इति भगवन्तं प्रार्थयामास। तदङ्गीकृत्य शिलामिमां भक्त्या पूजय। सिंहवटक्षेत्रमिति इदं जगत्पूज्यं भविष्यतीति उक्त्वा तां शिलां प्राविशत् नरसिंहः । सिंहवटक्षेत्रमाहात्म्यं निशम्य मुनिम् अभिपूज्य पाण्ड्यराजः मदनगोपालस्य माध्याह्निकीं पूजां विधाय धन्यतामाप।

द्वादशोऽध्यायः– 16 श्लोकाः। अथ स्वपुत्रं अभिषिच्य राज्यं प्रति तं प्रेषयित्वा सपत्नीकः पाण्ड्यनृपतिः जटायुषः क्षेत्रे मदनगोपालं सेवमानः स्वजीवनं सार्थकं चकार। इति मदनगोपालमाहात्म्यं विरचय्य काव्यफलश्रुतिमपि विलिख्य कविः विरराम।

<u>काव्यतत्त्वानि – सूक्तिरत्नानि -</u>

1) अथवा महतामेष स्वभावो दुरवग्रहः ।
2) स्वगुणान् शिष्यवर्गेषु कृपया रोपयन्ति यत् ।। 2. 29 ।।
3) न जातु पृथगासीत्प्रभा चन्द्रं विना प्रभो ।।3. 38 ।।
4) रञ्जयत्यनघं रत्नं चामीकरमिव प्रभो ।। 3.39 ।।
5) नृणामास्यं पिधातुं को नु शक्नुयात् ।। 4.27 ।।
6) यदुत्साहेन संसिध्येन्नहि तच्चिन्तया क्वचित् ।
7) चिन्ता नाम महान् व्याधिर्जरयत्यञ्जसा नरम् ।। 7.3 ।।
8) आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
9) क्षिप्रमक्रियमाणस्य कालः पिबति सम्पदः ।।7. 29 ।।

In Public domain. Digitization Muthulakshmi Research Academy

10) उदास्ते यो गुरुं तस्य मन्त्रो न फलति क्वचित् ।। 7.41 ।।

11) यथा देवे तथाचार्ये भक्तिः कार्या विजानता ।7.42।

12) क्व भवन्तो महान्तोमी क्वाहं नीचात्मानां वरः ।

कृतज्ञतासमर्पणम् -

मदनगोपालमाहात्म्यम् इति काव्यस्य प्रतिं दत्त्वा पीठिकालेखनायापि समुचितं समाचारं प्रदाय माम् निस्तुलम् उपकृतवद्भ्यः आचार्येभ्यः श्रीवैद्यं वेङ्कटेश्वराचार्युलुवर्येभ्यः कृतज्ञतापूर्वकं वन्दनशतानि समर्पयामि। मदनगोपाल-माहात्म्यस्य कृतिभर्तुः श्रीराजा सुरभि वेङ्कटजगन्नाथ-रावुबहद्दरुवर्यस्य चित्रं प्रदाय उपकृतवते जटप्रोलुसंस्थानशासकवंशजाय राजा वेङ्कटकुमारकृष्णबालादित्य-लक्ष्मारावमहोदयाय कार्तज्ञ्यं समर्पयामि। काव्यस्यास्य सम्पादनकर्मणि मां सदा प्रचोदयद्भ्यः निदेशकेभ्यः प्राचार्येभ्यः के. नीलकण्ठेभ्यः नतशिरसा कृतज्ञतां निवेदयामि। सम्पादनकर्मणि साहाय्यम् आचरितवतः विदुषः जोषि भरद्वाजस्य अभिवृद्धिं कामयमानाऽहं तम् अभिनन्दामि। काव्यस्य क्लिष्टम् उट्टङ्कनकार्यम् अङ्गीकृत्य माम् उपकुतवते श्रीमते सामलमोहनमहोदयाय कृतज्ञतां समर्पयामि। उस्मानिया विश्वविद्यालयस्य उपकुलपतिभ्यः प्राचार्येभ्यः डि. रवीन्दर-महाभागेभ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य उपकुलपतिभ्यः श्रीनिवासवरखेडि महोदयेभ्यः कुलसचिवाय प्रा. गायत्रीमुरलीकृष्णमहाभागाय च कार्तज्ञ्यम् आविष्करोमि।

इत्थं निवेदयिता

डॉ.के. वरलक्ष्मीः

उपनिदेशिका

In Public domain. Digitization Muthulakshmi Research Academy

रुक्मणीसत्यभामाभ्यां सहितः मदनगोपालस्वामी



In Public domain. Digitization Muthulakshmi Research Academy

जटप्रोलुस्थमदनगोपालस्वामिदेवालयः



In Public domain. Digitization Muthulakshmi Research Academy

जटायुपक्षिणः देवालयस्य च चित्रसहितं जटप्रोलुसंस्थानस्य चिह्नम्



अर्वाचीनं जटाप्रोलुसंस्थानस्य चिह्नम्

In Public domain. Digitization Muthulakshmi Research Academy

कृतिकर्ता - श्रीकृष्णब्रह्मतन्त्रपरकालमहादेशिकाः
(पूर्वाश्रमे होसदुर्गं कृष्णमाचार्यः)



मदनगोपालमाहात्म्यस्य कृतिभर्त्ता - श्रीराजा सुरभि वेङ्कटजगन्नाथरावुबहद्दरु



(जटप्रोलुसंस्थानशासकवंशजेन राजा
वेङ्कटकुमारकृष्णबालादित्यलक्ष्मारावमहोदयेन प्रदत्तमिदं चित्रम्)

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूचिका

Foreword

प्राक्कथनम्

- प्रथमोऽध्यायः 1
- द्वितीयोऽध्यायः 6
- तृतीयोऽध्यायः 10
- चतुर्थोऽध्यायः 15
- पञ्चमोऽध्यायः 20
- षष्ठोऽध्यायः 25
- सप्तमोऽध्यायः 29
- अष्टमोऽध्यायः 34
- नवमोऽध्यायः 38
- दशमोऽध्यायः 44
- एकादशोऽध्यायः 48
- द्वादशोऽध्यायः 52
- अक्षरक्रमगतश्लोकसूची 55

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्री हयग्रीवाय नमः

श्रीमते श्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाय नमः ।

श्रीमते श्रीकृष्णब्रह्मतन्त्रपरकालमहादेशिकाय नमः ।

॥ मदनगोपालमाहात्म्यम् ॥

ऋषयः ऊचुः -

श्रीमद्भागवतं पाण्ड्यश्श्रुत्वा भक्त्या स भूपतिः ।
ततः किमकरोत् सर्वं ब्रूहि नः कृपया मुने ॥ 1 ॥

श्रीसूतः –

इति पृष्टस्स तैर्धीमानादरोत्फुल्ललोचनैः ।
स्निग्धगम्भीरमधुरं मारीचः काश्यपोऽब्रवीत् ॥ 2 ॥

काश्यपः –

श्रूयतां मुनिभिस्सर्वैराख्यानं भद्रमस्तु वः ।
पाण्ड्यस्य कृष्णपादाब्जध्यानशिक्षितचेतसः ॥ 3 ॥

महाभागवतस्सोऽयं महाभागवतामृतम् ।
निपीयकर्णाञ्जलिना चिरं सुहितमानसः ॥ 4 ॥

ध्यायं ध्यायं महात्मानं परमात्मानमव्ययम् ।
वसुदेवसुतं साक्षाद्गोपीजनवशंवदम् ॥ 5 ॥

तत्पदन्यासपूतानि जगतां पावनानि च ।
द्वारकामधुरादीनि क्षेत्राणि द्रष्टुमुत्सुकः ॥ 6 ॥

तत्रतत्र कृतावासमर्चारूपेण माधवम् ।
गोविन्दं पुण्डरीकाक्षं सेवितुं कृतकौतुकः ॥ 7 ॥

सुनीति नाम्नि सचिवे न्यस्तराज्यभरो नृपः ।
आदायाल्पं परिवारं यात्रैकायत्तमानसः ॥ 8 ॥

पुत्रं दारान् पुरस्कृत्य दैवज्ञांश्च पुरोहितान् ।
दत्वा यथेष्टं विप्रेभ्यो दानानि विविधानि च ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दूरादनुगतः पौरैस्ताननुज्ञाप्य सादरम् ।
निवर्त्य मन्त्रिणं चापि प्रतस्थे ह्युत्तरां दिशम् ॥ 10 ॥

स्नात्वा कवेरजातीर्थे प्रथमं राजसत्तमः ।
क्षेत्रमाद्यं स्वयं व्यक्तं श्रीरङ्गं प्राविशन्मुदा ॥ 11 ॥

कावेरीयुगलीदोर्भ्यां धरणोत्सुकचेतसा ।
उपगूह्योरसि निजे प्रस्वापितमिवाच्युतम् ॥ 12 ॥

तदन्तरे शयानं तं शेषतल्पे श्रियःपतिम् ।
प्रावृषेण्यमिवाम्भोदं प्रालेयगिरिमूर्धनि ॥ 13 ॥

अभिवीक्ष्य महाबाहुं पुण्डरीकायतेक्षणम् ।
रङ्गनाथं जगन्नाथं सम्प्रणम्य मुहुर्मुहुः ॥ 14 ॥

उषित्वा कतिचित्तत्र दिनानि स महीपतिः ।
प्रदाय वसु विप्रेभ्यस्तस्माद्देशात्तदाऽत्यगात् ॥ 15 ॥

तत्र तत्र जगन्नाथमर्चारूपेण भासुरम् ।
संसेव्य नृपतिः काञ्च्या वरदं द्विरदाचले ॥ 16 ॥

क्षेत्राण्यष्टादशाप्येष तत्र वीक्ष्य महामनाः ।
तथा यदुगिरौ श्रीमन्नारायणमनन्यधीः ॥ 17 ॥

स्नात्वा कल्याणसरसि दृष्ट्वा देवं जगत्पतिम् ।
श्रीमानादिवराहं तमभ्यर्च्य च सरस्तटे ॥ 18 ॥

नृसिंहगिरिमारुह्य नरसिंहं ददर्श सः ।
अवतीर्य गिरिस्तस्माद्धृष्टरोमा मुहुर्मुहुः ॥ 19 ॥

स्मारं स्मारं नृसिंहं तं दिव्यमङ्गलविग्रहम् ।
रथमारुह्य मेधावी प्रतस्थे वेङ्कटाचलम् ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चषैर्दिवसैश्श्रीमानवाप गिरिसन्निधिम् ।
तत्र संसेव्य गोविन्दमारुह्याथ महोन्नतम् ॥ 21 ॥

साक्षाच्छेषावतारं तं श्रीमन्तं वेङ्कटाचलम् ।
कुमुदोत्पलकल्हारमरन्दरसनिर्भरे ॥ 22 ॥

स्वामिपुष्करिणीतीर्थे स्नात्वोत्तीर्य ततो नृपः ।
तत्र हैमविमानान्तर्भासमानं जगत्पतिम् ॥ 23 ॥

भृङ्गराजमिव श्रीमान्मानसाम्भोरुहान्तरे ।
देवं सर्वजगत्तापनिर्धूननमहाम्बुदम् ॥ 24 ॥

श्रुतिमौलिमहानीलमिन्दीवरसमच्छविम् ।
लोलालकावलीभृङ्गमनोज्ञवदनाम्बुजम् ॥ 25 ॥

कोटिसूर्यप्रतीकाशरत्नकोटीरभूषितम् ।
गण्डमण्डलचण्डांशुलसत्कुण्डलमण्डितम् ॥ 26 ॥

पुण्डरीकविशालाक्षं सुनसं सुस्मिताधरम् ।
चन्द्रसूर्यसमज्योतिश्शङ्खचक्रकराम्बुजम् ॥ 27 ॥

श्रीवत्सकौस्तुभाभ्यां च लोलया वनमालया ।
जगदीशानया लक्ष्म्या पूर्णवक्षस्थलं हरिम् ॥ 28 ॥

तनुमध्यं निम्ननाभिं दीर्घबाहुस्थलं हरिम् ।
उद्दामविद्युद्रुचिरपीताम्बरमनोहरम् ॥ 29 ॥

स्फुरत्कटककेयूरकाञ्चीहंसकभूषणम् ।
अनन्तकल्याणगुणरत्नरत्नाकरायितम् ॥ 30 ॥

स्वतपोहतपाप्मानं श्रीनिवासं जगद्गुरुम् ।
जगदेकनियन्तारं विधातारं मनोरथान् ॥ 31 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दूरादनुगतः पौरैस्ताननुज्ञाप्य सादरम् ।
निवर्त्य मन्त्रिणं चापि प्रतस्थे ह्यूत्तरां दिशम् ॥ 10 ॥

स्नात्वा कवेरजातीर्थे प्रथमं राजसत्तमः ।
क्षेत्रमाद्यं स्वयं व्यक्तं श्रीरङ्गं प्राविशन्मुदा ॥ 11 ॥

कावेरीयुगलीदोर्भ्यां धरणोत्सुकचेतसा ।
उपगूह्योरसि निजे प्रस्वापितमिवाच्युतम् ॥ 12 ॥

तदन्तरे शयानं तं शेषतल्पे श्रियःपतिम् ।
प्रावृषेण्यमिवाम्भोदं प्रालेयगिरिमूर्धनि ॥ 13 ॥

अभिवीक्ष्य महाबाहुं पुण्डरीकायतेक्षणम् ।
रङ्गनाथं जगन्नाथं सम्प्रणम्य मुहुर्मुहुः ॥ 14 ॥

उषित्वा कतिचित्तत्र दिनानि स महीपतिः ।
प्रदाय वसु विप्रेभ्यस्तस्माद्देशात्तदाऽत्यगात् ॥ 15 ॥

तत्र तत्र जगन्नाथमर्चारूपेण भासुरम् ।
संसेव्य नृपतिः काञ्च्या वरदं द्विरदाचले ॥ 16 ॥

क्षेत्राण्यष्टादशाप्येष तत्र वीक्ष्य महामनाः ।
तथा यदुगिरौ श्रीमन्नारायणमनन्यधीः ॥ 17 ॥

स्नात्वा कल्याणसरसि दृष्ट्वा देवं जगत्पतिम् ।
श्रीमानादिवराहं तमभ्यर्च्य च सरस्तटे ॥ 18 ॥

नृसिंहगिरिमारुह्य नरसिंहं ददर्श सः ।
अवतीर्य गिरिस्तस्माद्धृष्टरोमा मुहुर्मुहुः ॥ 19 ॥

स्मारं स्मारं नृसिंहं तं दिव्यमङ्गलविग्रहम् ।
रथमारुह्य मेधावी प्रतस्थे वेङ्कटाचलम् ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चषैर्दिवसैश्श्रीमानवाप गिरिसन्निधिम् ।
तत्र संसेव्य गोविन्दमारुह्याथ महोन्नतम् ॥ 21 ॥

साक्षाच्छेषावतारं तं श्रीमन्तं वेङ्कटाचलम् ।
कुमुदोत्पलकल्हारमरन्दरसनिर्भरे ॥ 22 ॥

स्वामिपुष्करिणीतीर्थे स्नात्वोत्तीर्य ततो नृपः ।
तत्र हैमविमानान्तर्भासमानं जगत्पतिम् ॥ 23 ॥

भृङ्गराजमिव श्रीमान्मानसाम्भोरुहान्तरे ।
देवं सर्वजगत्तापनिर्धूननमहाम्बुदम् ॥ 24 ॥

श्रुतिमौलिमहानीलमिन्दीवरसमच्छविम् ।
लोलालकावलीभृङ्गमनोज्ञवदनाम्बुजम् ॥ 25 ॥

कोटिसूर्यप्रतीकाशरत्नकोटीरभूषितम् ।
गण्डमण्डलचण्डांशुलसत्कुण्डलमण्डितम् ॥ 26 ॥

पुण्डरीकविशालाक्षं सुनसं सुस्मिताधरम् ।
चन्द्रसूर्यसमज्योतिश्शङ्खचक्रकराम्बुजम् ॥ 27 ॥

श्रीवत्सकौस्तुभाभ्यां च लोलया वनमालया ।
जगदीशानया लक्ष्म्या पूर्णवक्षस्थलं हरिम् ॥ 28 ॥

तनुमध्यं निम्ननाभिं दीर्घबाहुस्थलं हरिम् ।
उद्दामविद्युद्रुचिरपीताम्बरमनोहरम् ॥ 29 ॥

स्फुरत्कटककेयूरकाञ्चीहंसकभूषणम् ।
अनन्तकल्याणगुणरत्नरत्नाकरायितम् ॥ 30 ॥

स्वतपोहतपाप्मानं श्रीनिवासं जगद्गुरुम् ।
जगदेकनियन्तारं विधातारं मनोरथान् ॥ 31 ॥

In Public domain. Digitization Muthulakshmi Research Academy

चक्षुषोर्गोचरं कुर्वन् सम्प्रहृष्टतनूरुहः ।
मुहुर्मुहुः प्रणम्येनं बाष्पगद्गदया गिरा ॥ 32 ॥

भगवन् सर्वदाप्यस्मानभिरक्ष दयानिधे ।
त्वमेको जगतां नाथो विना त्वां नेतरागतिः ॥ 33 ॥

इति सम्प्राप्य हृष्टात्मा पुनर्नत्वा श्रियःपतिम् ।
प्रदाय बहुदानानि तत्प्रीत्यै तत्र भूपतिः ॥ 34 ॥

तदनुज्ञां ततो लब्ध्वा परिपूर्णमनोरथः ।
तेनैव गिरिमार्गेण पुरस्कृत्य निजान् जनान् ॥ 35 ॥

उत्तरां दिशमुद्दिश्य जगामपुरुषर्षभः ।
मृगराजकिशोरौघशीर्णकुम्भस्थलैर्गजैः ॥ 36 ॥

स्रवद्रक्तैरिवाहार्यैर्गैरिकस्यन्दपाटलैः ।
नखवज्रविनिर्भिन्ननानाविधमृगार्भकैः ॥ 37 ॥

घोररूपैर्महाव्याघ्रैश्चमरैस्सृमरैरपि ।
महिषैर्मेघसंकाशैर्भल्लूकैर्गण्डकैरपि ॥ 38 ॥

गोलाङ्गूलैर्महाकायैर्वानरैः पर्वतोपमैः ।
अदृष्टपूर्वरूपैश्च सुन्दरैर्विकृतैरपि ॥ 39 ॥

सत्त्वैरनेकैराकीर्णं महागम्भीरदर्शनम् ।
आदित्यरथगन्धर्वविश्रान्तिरचनक्षमैः ॥ 40 ॥

विन्ध्यायमानैरन्यैश्च महामेघायितैरपि ।
छत्रायमाणैरन्यैश्चाप्यन्धकारितदिङ्मुखैः ॥ 41 ॥

सालतालतमालाद्यैस्सान्द्रपर्णैर्महीरुहैः ।
दुष्प्रवेशं लताभिश्च महारण्यं विलोकयन् ॥ 42 ॥

अहो गिरे रम्यतास्येत्यति विस्मितमानसः ।
धनुर्धरैर्भटैस्सर्वैर्गुप्तस्सोऽयं महीपतिः ॥ 43 ॥

योजनानि बहून्येष व्यतीयाय परन्तपः ।
तत्र कुत्रचन श्रीमान् स्नात्वा तीर्थेऽघनाशने ॥ 44 ॥

गरुडाचलवेदाद्रि प्रान्तैकान्ततरद्रुमे ।
करालवदनं घोरसटामकुटभासुरम् ॥ 45 ॥

शङ्खचक्रधरं देवं हिरण्यकशिपुद्विषम् ।
नरसिंहं प्रणम्याथ पुरतस्सञ्चलन्नृपः ॥ 46 ॥

बहुदूरमतिक्रम्य तत्र श्रीशैलभूधरे ।
मल्लिकार्जुननामानं समीक्ष्य परमेश्वरम् ॥ 47 ॥

पश्चिमां दिशमाकाङ्क्षन्नत्यगाद्योजनत्रयम् ।
प्रवहन्तीं तत्र कृष्णां सरितां प्रवरां शुभाम् ॥ 48 ॥

महानीलमणिच्छायां तां ददर्श स पाण्ड्यराट् ।
या तत्र सङ्गता षड्भिर्नदीभिरधिकोज्वला ॥ 49 ॥

तुङ्गया भद्रया वेण्या भीमरथ्या द्विजोत्तमाः ।
तथा च भवनाशिन्या दुग्धनद्या च रम्यया ॥ 50 ॥

तद्धि सप्तनदीसङ्गस्थानमित्यभिधीयते ।
तत्रैकबिन्दुसंस्पर्शादपि नश्यत्यसंशयम् ॥ 51 ॥

ब्रह्महत्यासहस्राणि किं पुनर्नियमाप्लवात् ।
तत्र स्नात्वा महानद्यां चन्द्रसूर्यहृदान्तरे ॥ 52 ॥

चक्रतीर्थे च राजेन्द्रस्सर्वपापविनाशने ।
तत्रागस्त्याश्रमं रम्यं प्रविश्यमुदिताननः ॥ 53 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तेनागस्त्येन मुनिना प्रतिष्ठापितमुज्वलम् ।
अभिवीक्ष्य महालिङ्गं शङ्करं लोकशङ्करम् ॥ 54 ॥
गव्यूतिमात्रं पन्थानमतिचक्राम तद्वनात् ॥ 54 ॥

रुचिरकुसुमतारकाभिरामच्छदनगभीरतमो विनीलमध्यम् ।
दिनकरकिरणालिदुष्प्रवेशं किमपि वनं प्रविवेश तत्र भूपः ॥

इति श्रीमद्भविष्योत्तरपुरणे श्रीजटायुक्षेत्रमदनगोपालमाहात्म्ये पाण्ड्ययात्राप्रसङ्गो नाम प्रथमोऽध्यायः ।

****

॥ अथ द्वितीयोऽध्यायः ॥

श्रीकाश्यपः –

प्रविश्य तद्वनं रम्यं राजा राजीवलोचनः ।
सुप्रसन्नेन मनसा सस्नौ कृष्णानदीजले ॥ 1 ॥

स्नात्वा सन्ध्यामुपास्याथ देवर्षिपितृतर्पणम् ।
समाप्य माधवं ध्यायन् जजाप परमं मनुम् ॥ 2 ॥

जपतोऽस्य महाबाहोः कृष्णैकायत्तचेतसः ।
प्रादुरासन्निमित्तानि कल्याणानि महान्त्यथ ॥ 3 ॥

प्रास्फुरद्धक्षिणो बाहुर्नयनं चापि दक्षिणम् ।
सुप्रसन्नं मनश्चासीच्छारदह्रदसन्निभम् ॥ 4 ॥

अचिन्तयन्निमित्तैस्तैरपूर्वैश्शुभपोषकैः ।
हृष्टरोमा महातेजाः पाण्ड्यो भागवतप्रियः ॥ 5 ॥

ईदृशानि निमित्तानि नैव वन्ध्यानि जातुचित् ।
प्रायशो भगवान् साक्षादात्मानं दर्शयिष्यति ॥ 6 ॥

अथवा भगवत्पादपङ्कजैकान्तचेतसाम् ।
महतामचिरादेव दर्शनं सम्भविष्यति ॥ 7 ॥

इतोऽपि नान्यद्विद्येत निमित्तानां महाफलम् ।
नह्यल्पेन निमित्तेन तादृक्पुण्यं नृणां भवेत् ॥ 8 ॥

इति चिन्तयतोऽमुष्य दिव्यदुन्दुभिनिस्वनः ।
वीणावेणुमृदङ्गादितूर्यनादमनोहरः ॥ 9 ॥

नृत्यत्स्वर्गणिकाहैममञ्जीरध्वनिमञ्जुलः ।
श्रवणद्वन्द्वपदवीमारुरोह यदृच्छया ॥ 10 ॥

अविदूरान्निनादं तं श्रुत्वा तां दिशमैक्षत ।
प्रसृतः ककुभो यस्याश्शङ्खभेर्यादिनिस्वनः ॥ 11 ॥

प्रायशो भगवत्क्षेत्रमेतत्स्यान्नात्र संशयः ।
इति निश्चित्य मनसा सैन्यानाज्ञपयत्तदा ॥ 12 ॥

राजा-

तावदत्रैव युष्माभिस्स्थेयं यावदहं पुनः ।
आव्रजामि ध्वनेरस्य ज्ञात्वा रम्यस्य कारणम् ॥ 13 ॥

काश्यपः –

इत्याज्ञाप्य महाबाहुस्सैनिकान् सञ्चरन् पदा ।
जायापुत्रयुतश्श्रीमान्प्राविशत्तद्वनं महत् ॥ 14 ॥

अदवीयसि देशेऽथ दिव्यचम्पककुड्मलैः ।
मालतीपारिजाताद्यैराचितद्वारमद्भुतम् ॥ 15 ॥

देवसन्दर्शनाकाङ्क्षिमुनिबृन्दनिरन्तरम् ।
विमानं सूर्यसङ्काशं ददर्श स महामनाः ॥ 16 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दर्शनादेव तस्याथ विमानस्यामितौजसः ।
उत्फुल्लवदनाम्भोजसमुन्निद्रतनूरुहः ॥ 17 ॥

पुत्रेण जायया चापि विस्मितः प्रणनाम तत् ।
पुनः पुनः प्रणम्यैतदविश्रान्तोऽभवन्नृपः ॥ 18 ॥

अथ तस्य विमानस्य समीपमुपसृत्य सः ।
वसिष्ठं वामदेवं च कृष्णद्वैपायनं तथा ॥ 19 ॥

व्याघ्रपादञ्च कण्वं च ऋश्यश्रृङ्गं च रोमशम् ।
जाबालिमत्रिं पुलहं क्रतुमङ्गिरसं तथा ॥ 20 ॥

कपिलं च महात्मानं जैमिनिं च्यवनं तथा ।
अन्यानपि मुनीन् देव सेवार्थं समुपस्थितान् ॥ 21 ॥

महोदारान्महाशान्तान्यतचित्तान् दृढव्रतान् ।
अद्राक्षीत्पाण्ड्यभूपालः प्रणनाम च तान्मुदा ॥ 22 ॥

ते तमुद्वीक्ष्य कुशलमपृच्छन्मुनिसत्तमाः ।

मुनयः -

महाभागवत श्रीमन् स्वागतं ते महामते ॥ 23 ॥

चिराच्छ्रुतोऽसि दिष्ट्या त्वमद्य प्रत्यक्षतां गतः ।
यत्तद्दर्शनमासीन्नः परमं खल्विदं फलम् ॥ 24 ॥

न खल्वल्पेन तपसा त्वादृशां कृष्णचेतसाम् ।
राजर्षे लभ्यते जातु दर्शनं श्रेयसां पदम् ॥ 25 ॥

इति तैस्संस्तुतश्श्रीमान् पाण्ड्यराजो महायशाः ।
कृताञ्जलिरुवाचेदं वचो विनयमेदुरम् ॥ 26 ॥

राजा-

तपश्चर्यासुनिष्ठेभ्यो भवद्भ्योऽस्तु नतिर्मम ।
विपरीतैर्वचोभिर्मामाकुलं कुरुताद्यमा ॥ 27 ॥

In Public domain. Digitization Muthulakshmi Research Academy

क्व भवन्तो महान्तोऽमी क्वाहं नीचात्मनां वरः ।
महाभागवतत्वं मे क्व भवेन्मुनिसत्तमाः ॥ 28 ॥

अथवा महतामेष स्वभावो दुरवग्रहः ।
स्वगुणान् शिष्यवर्गेषु कृपया रोपयन्ति यत् ॥ 29 ॥

श्री काश्यपः –

इति बद्धाञ्जलिश्श्रीमांस्तान्विज्ञाप्य तदाज्ञया ।
प्रविवेश विमानस्य मध्यं मुदितमानसः ॥ 30 ॥

कमलदलविशालनेत्रमुद्यद्दिनकरभासुरनूत्नरत्नमौलिम् ।
चलदलकलसत्सितांशुबालप्रतिमललाटमुदारचारुहासम् ॥ 31 ॥

नवनवरुचिपद्मरागराजीखचितमनोहरकुण्डलात्तगण्डम् ।
सुनसमरुणबिम्बपाटलोष्ठं दशनतिरस्कृतमौक्तिकालिकान्तिम् ॥32॥

कुसुमशरधनुर्विभासितभ्रूयुगलमुदारगभीरकम्बुकण्ठम् ।
अमरपतिशरासनानघश्रीरुचिरमयूरमनोज्ञपिञ्छचूडम् ॥ 33 ॥

करकमलयुगात्तवेणुनादस्वरविवशीकृतगोपिकान्तरङ्गम् ।
अतिरुचिरविशालपीनवक्षस्थलविलसन्मणिराजदिव्यचिह्नम् ॥34॥

प्रसृमरघनसौरभानुकृष्णभ्रमरलसद्वनमालिकामनोज्ञम् ।
कररुचिरविनन्दिनीसमुद्यत्कुमुदसरोरुहशोभिशङ्खचक्रम् ॥ 35 ॥

मणिमयकटकाङ्गदादिभूषासमुदयभूषितदीर्घबाहुम् ।
सुरपतिमणिमालिकाविनीलच्छविविलसत्तनुरोमराजिरम्यम् ॥36॥

जलधररुचिरजैत्रविग्रहाभं त्रिवलिविशोभितनूदराभिरामम् ।
तटिदुपमितहैमकाञ्चिराजत्कनकसुचेलविभासुरान्तरीयम् ॥ 37 ॥

करिकरनिभपीवरोरुकाण्डं तनुतरमध्यतलं गभीरनाभिम् ।
मृदुलकिसलयोल्लसत्पदाब्जं पदकटकादिविभूषणैर्लसन्तम् ॥ 38 ॥

In Public domain. Digitization Muthulakshmi Research Academy

अविरतनिजपार्श्वयुग्मखेलज्जलधिसुताधरणीविहारलोलम् ।
भुवनजननरक्षणान्तहेतुं सकलसुरासुरमान्यपादपीठम् ॥ 39 ॥

तमिममनघसद्गुणौघसिन्धुं कुसुमशरासनकोटिसुन्दराङ्गम् ।
मुदितहृदथ बालवेणुगोपं सदयमगस्त्यतपःफलं ददर्श ॥ 40 ॥

आपादमौलितमिमं प्रविलोक्य देव-
मुत्तुङ्गसम्मदमहीधरशृङ्गवर्ती ।
पाण्ड्योऽतिविस्मितमना बहुभागधेयं
पूर्वार्जितं फलितमद्य ममेत्यमंस्त ॥ 41 ॥

समुल्लसद्बाष्पगभीरगद्गदस्वरस्स्तुवन् गोपवधूमनोहरम् ।
विलोक्य शश्वद्वसुदेवनन्दनं न तृप्यति स्मावनिनायकोत्तमः ॥ 42

इति श्रीभविष्योत्तरपुराणे मदनगोपालमाहात्म्ये
भगवद्दर्शनं नाम द्वितीयोऽध्यायः ।

****

॥ अथ तृतीयोऽध्यायः ॥

श्रीकाश्यपः –

कथञ्चन चिराद्देवाद्दृष्टिमाकृष्य भूपतिः ।
प्रणम्य जायापुत्राभ्यां साकं तं नन्दनन्दनम् ॥ 1 ॥

अपसृत्य पदन्यासैर्मन्दं मन्दमुदारधीः ।
निषसाद महर्षीणां सभामध्ये तदाज्ञया ॥ 2 ॥

तमेव हृदये ध्यायन् सम्प्रहृष्टतनूरुहः ।
कृताञ्जलिस्तान् पप्रच्छ महर्षीन् पाण्ड्यभूपतिः ॥ 3 ॥

राजा –

भो मुनीन्द्रा महात्मानो भवन्तो भूरितेजसः ।

In Public domain. Digitization Muthulakshmi Research Academy

मत्प्रश्नस्योत्तरं ब्रूथ यदि वो मय्यनुग्रहः ॥ 4 ॥

भगवानेष गोपालस्तपसा कस्य तोषितः ।
प्रादुराशीदिह श्रीमान् दुर्लभो यमिनामपि ॥ 5 ॥

किन्निमित्तमिह श्रीमानरविन्दविलोचनः ।
आविर्भूतो महारण्ये तत्सर्वं ब्रूथ विस्तरम् ॥ 6 ॥

धन्यो युष्मन्मुखाम्बोजमकरन्दझरीं कथाम् ।
श्रोत्राञ्जलिभ्यां प्रपिबन् सन्तापान् विधुनोम्यहम् ॥ 7 ॥

श्रीकाश्यपः –

इति पाण्ड्यावनीशेन तेन पृष्टा महर्षयः ।
ते सर्वे तां कथां वक्तुं वेदव्यासं व्यचोदयन् ॥ 8 ॥

मुनयः ऊचुः –

त्वं हि सर्वकथाभिज्ञो निर्मितं भारतं त्वया ।
त्वमुदग्रवचाश्श्रीमांस्त्वदायत्ता अमी वयम् ॥ 9 ॥

एष भक्तो हरेस्साक्षात्पाण्ड्यः पृच्छति भक्तितः ।
वेणुगोपालचरितं पूरयास्य मनोरथम् ॥ 10 ॥

श्रीकाश्यपः –

इति तैः प्रार्थितश्श्रीमान् कृष्णद्वैपायनो मुनिः ।
गोविन्दमभिनन्द्यैनं वक्तुं समुपचक्रमे ॥ 11 ॥

व्यासः –

अहो ते श्रेयसी बुद्धी राजर्षे पाण्ड्यसत्तम ।
यदेतस्य कथां श्रोतुमौत्सुक्यं तेऽभिवर्धते ॥ 12 ॥

श्रूयतामभिधास्यामि महर्षिणां च श्रुण्वताम् ।
सावधानो भव श्रीमंश्चरितश्रवणे हरेः ॥ 13 ॥

In Public domain. Digitization Muthulakshmi Research Academy

अयोध्या नाम नगरी कोसलेषु बभूव ह ।
तामावसन् दशरथो राजा जगदपालयत् ॥ 14 ॥

धर्मपत्न्योऽस्य कौसल्या कैकेयी चेति भूपतेः ।
सुमित्रेति च विख्याता तिस्रोऽभूवन् विशाम्पते ॥ 15 ॥

कौसल्यायां समुत्पन्नस्तत्र रामो महाभुजः ।
सुधाकर इव श्रीमान् वीच्यां दुग्धपयोनिधेः ॥ 16 ॥

साक्षाल्लक्ष्मीपतिस्सोऽयं भगवान्भूतभावनः ।
शङ्खचक्रगदापाणिरिति सर्वत्र गीयते ॥ 17 ॥

कैकेयीगर्भसम्भूतो भरतोऽभिरतोऽग्रजे ।
वीरौ लक्ष्मणशत्रुघ्नौ सुमित्रागर्भसम्भवौ ॥ 18 ॥

ते विष्णोरंशसम्भूतास्तनयोऽप्यमिततेजसः ।
अनुचक्रुर्गुणैस्स्वैस्स्वैः कौसल्यानन्दवर्धनम् ॥ 19 ॥

मिथिलाधिपतेः पुत्री जनकमहात्मनः ।
सीतेति नाम्ना विख्याता पत्नी रामस्य मानद ॥ 20 ॥

ऊर्मिलालक्ष्मणस्यासीद्भार्या गुणगणोज्वला ।
माण्डवीश्रुतकीर्तिश्च द्वयोर्भार्ये तथान्ययोः ॥ 21 ॥

स सत्यवचनाद्भीतः पितुराज्ञामनुव्रतः ।
रामो दाशरथिश्श्रीमान् प्रविष्टो दण्डकावनम् ॥ 22 ॥

लक्ष्मणेन सह भ्राता सीतया चापि भार्यया ।
विराधं राक्षसं तत्र यमलोकं निनाय सः ॥ 23 ॥

शरभङ्गं प्रणम्याथ सुतीक्ष्णं च महामुनिम् ।
उषित्वा तत्रतत्रैष दिनानि कतिचिद्वने ॥ 24 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सुतीक्ष्णस्याश्रमपदात्प्रस्थाय पुरुषर्षभः ।
सालैस्तालैस्तमालैश्च चम्पकाशोककिंशुकैः ॥ 25 ॥

करवीरैर्बीजपूरैर्वञ्जुलैर्हिञ्जुलैरपि ।
कोविदारैरुदारैश्च पनसैरनसैरपि ॥ 26 ॥

जम्भीरैश्च कदम्बैश्च कुटजैः पाटलैरपि ।
सत्पलाशैः पलाशैश्च चूतैस्स्फीतैर्विभीतकैः ॥ 27 ॥

पारिभद्रैस्तथोन्निद्रैर्मल्लिकावल्लिकाञ्चितैः ।
घनं सुशीलतरं शिशिरह्रदभासुरम् ॥ 28 ॥

धूतवैरैर्महासत्त्वैर्विहरद्भिर्मनोहरम् ।
अगस्त्यस्याश्रमपदं प्राविशद्रघुनन्दनः ॥ 29 ॥

तत्रागस्त्यं महातेजा ववन्दे सह लक्ष्मणः ।
साकं जनकनन्दिन्या विनयावनताननः ॥ 30 ॥

तं विलोक्य महाभागमगस्त्यो मुनिसत्तमः ।
आशिषः परिगृह्यादावपृच्छत्कुशलं ततः ॥ 31 ॥

स्वागतं ते जगन्नाथ भगवन् भूतभावन ।
ध्यायतां नश्चिराच्चक्षुर्गोचरोऽसि दयानिधे ॥ 32 ॥

नरवेषप्रतिच्छन्नो भवान्नारायणो हरिः ।
तत्वज्ञैर्ज्ञायसे रत्नं मृदाच्छन्नमिव प्रभो ॥ 33 ॥

कैकेयीवचसे तस्मै श्रेयांस्यभ्यर्थयामहे ।
श्रान्तान् सञ्जीवयत्स्मान् भवान् येनाद्य निर्गतः ॥ 34 ॥

दिष्ट्या प्राप्तोऽसि भद्रं ते मदाश्रमपदं विभो ।
अहल्याघविनाशिभ्यां पद्भ्यामेवं मुदाचर ॥ 35 ॥

In Public domain. Digitization Muthulakshmi Research Academy

न केवलमहं धन्यस्त्वन्मुखाम्भोजदर्शनात् ।
एते मृगाः पक्षिणश्च तरवः पर्वता अपि ॥ 36 ॥

निर्वृत्तं रघुशार्दूल तपसा नः प्रयोजनम् ।
यावत्त्वद्दर्शनं श्रीमंस्तावदेव तपःक्रिया ॥ 37 ॥

साक्षाल्लक्ष्मीरियं सीता वनेऽपि त्वामनुव्रता ।
न जातु पृथगासीत्प्रभा चन्द्रं विना प्रभो ॥ 38 ॥

स एष लक्ष्मणश्श्रीमाननुजस्त्वामनुव्रतः ।
रञ्जयत्यनघं रत्नं चामीकरमिव प्रभो ॥ 39 ॥

धन्योऽस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ।
भवतो दर्शनात्पूजां गृहाण कृपया मम ॥ 40 ॥

व्यासः –

इत्युक्त्वार्घ्यं तथा पाद्यं कन्दमूलफलानि च ।
प्रदाय मधुपर्केण पूजयामास राघवम् ॥ 41 ॥

कानिचिद्दिवसान्येष तत्रोषित्वा रघूद्वहः ।
तद्दत्तमैन्द्रं कोदण्डं खड्गं च विमलत्सरुम् ॥ 42 ॥

शुभौ चाक्षयतूणीरौ वधार्थं सर्वरक्षसाम् ।
प्रतिगृह्य महातेजाः प्रपेदे परमां मुदम् ॥ 43 ॥

ततः पुरस्ताच्चलितुं स कौतुको महानुभावो रघुवंशवर्धनः ।
प्रणम्य हर्षात्तमगस्त्यमग्रतः प्रयाणमप्रार्थयतोद्धृताञ्जलिः ॥ 44 ॥

इति श्रीमद्भविष्योत्तरपुराणे मदनगोपालमाहात्म्ये
श्रीरामागस्त्याश्रमप्रवेशकथनं नाम तृतीयोऽध्यायः ।

****

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ चतुर्थोऽध्यायः ॥

व्यासः –

तदा प्रार्थयमानं तं प्रस्थानाय नरर्षभम् ।
उवाच मुनिशार्दूलो बाष्पप्रग्रथिताक्षरम् ॥ 1 ॥

अगस्त्यः –

चिरात्प्रार्थयमानानां त्वन्नो दृष्टिपथं गतः ।
प्रस्थितोऽस्य चिरादेव पश्यतां नस्सकौतुकम् ॥ 2 ॥

अथवा भुवनत्राणकृतदीक्षोऽसि राघव ।
भूमेर्भारायमाणं तं रावणं लोकरावणम् ॥ 3 ॥

निहत्य सङ्ख्ये देवानां मुनीनां च प्रियं कुरु ।
एतदर्थो हि ते भूमन्न(भूमाववतारो?)वतारो भुवि प्रभो ॥ 4 ॥

अतोऽग्रतो वने घोरे जगत्प्रियचिकीर्षया ।
चरितव्यं त्वयावश्यं न निरोधोऽस्ति तत्र मे ॥ 5 ॥

परन्त्वभ्यर्थना काचिदस्ति मे श्रूयतां विभो ।
न दुष्करं तवैतत् स्यात् परमोऽनुग्रहो मम ॥ 6 ॥

इतो दक्षिणतो दूरे श्रीमत्सिंहवटाभिधम् ।
क्षेत्रे विभाति यत्रास्ते नरसिंहो जगत्पतिः ॥ 7 ॥

अद्यर्धयोजने तस्माद्दक्षिणस्यां दिशि प्रभो ।
कृष्णागोदावरीमध्ये श्रीशैलस्यापि पश्चिमे ॥ 8 ॥

उद्देशे त्रिजगत्व्याते वने गम्भीरदर्शने ।
ममाश्रमपदं किञ्चित्तत्र राघव विद्यते ॥ 9 ॥

एतस्मादाश्रमपदात्तदतीव प्रियं मम ।
यत्र देवैरपि श्लाघ्ये सरितस्सप्तसङ्गताः ॥ 10 ॥

In Public domain. Digitization Muthulakshmi Research Academy

कृष्णा वेणी तथा तुङ्गा भद्रा क्षीरनदी तथा ।
तथा भीमरथी दिव्या नदी च भवनाशिनी ॥ 11 ॥

तद्धि सप्तनदीसङ्गक्षेत्रमित्यभिधीयते ।
तत्र सर्वतपस्सिद्धिर्ममासीद्रघुनन्दन ॥ 12 ॥

अगस्त्यक्षेत्रमाख्यातं परितो योजनत्रयम् ।
तदन्तरे पश्चिमायां दिशि गव्यूतिमात्रतः ॥ 13 ॥

क्षेत्रं जटायुषो भाति कृष्णाया उत्तरे तटे ।
निर्मलाख्या प्रवहते प्रतीच्यां तत्र निम्नगा ॥ 14 ॥

तत्र देवास्सगन्धर्वाश्चारणाश्च महर्षयः ।
जन्म काङ्क्षन्ति तपसा तोषयन्तश्श्रियःपतिम् ॥ 15 ॥

यथेदं भारतं वर्षं वर्षाणामुत्तमोत्तमम् ।
इदं क्षेत्रं तथाऽशेषक्षेत्राणामुत्तमोत्तमम् ॥ 16 ॥

तत्र त्वां कृतसान्निध्यं नित्यमिच्छामि सेवितुम् ।
अनुगृह्णीष्व भगवन्भक्तं मां भक्तवत्सलः ॥ 17 ॥

यथा त्वं परमे व्योम्नि वसस्यमितवैभवः ।
तथा तत्रापि च क्षेत्रे वसन् कुरु मम प्रियम् ॥ 18 ॥

त्वत्पादपरिचर्यायै प्रायः कृष्णापि निम्नगा ।
काङ्क्षत्येव न सन्देहस्ततः कुरु कृपां मयि ॥ 19 ॥

प्रायो भवत्पितुस्सख्युर्जटायोरप्यति प्रियम् ।
क्षेत्रं तत् सोऽप्यरण्यान्यामस्यां त्वां याचिता ध्रुवम् ॥ 20 ॥

सर्वेषां नः प्रियाय त्वं वस तत्र दयानिधे ।
त्वया पूरयितव्योऽयं महानस्मन्मनोरथः ॥ 21 ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्यास उवाच –

इति सम्प्रार्थितस्तेन रामो राजीवलोचनः ।
अनुध्याय क्षणं श्रीमान् स्मयमान उवाच ह ॥ 22 ॥

श्रीराम उवाच –

यदात्थ भगवन् प्रीत्या तत्तथैव परन्त्विह ।
मम विज्ञापनं किञ्चिदवधेहि कृपानिधे ॥ 23 ॥

अनेनैवात्मना तत्र वसेयं यदि सत्तम ।
चतुर्दशसु वर्षेषु यातेषु विपिनान्तरे ॥ 24 ॥

राजधानीमयोध्यां तामप्राप्ते च पुनर्मयि ।
विक्लबीभविता श्रीमान् भरतो भ्रातृवत्सलः ॥ 25 ॥

वनवासे समाप्ते तु मामदृष्ट्वा महामनाः ।
जहाति जीवितेऽप्याशां भरतो नात्र संशयः ॥ 26 ॥

अस्मिन्नेवं गते कार्ये जना मां भ्रातृघातिनम् ।
निन्दिष्यन्ति नृणामास्यं पिधातुं को नु शक्नुयात् ॥ 27 ॥

तदिदानीं निवृत्ते तु वनवासे महामुने ।
कृपया भरतं द्रष्टुं मामनुज्ञातुमर्हसि ॥ 28 ॥

अज्ञातिवर्तनादस्मान्माभूत्ते मनसोऽप्रियम् ।
तवापि ननु कर्तव्यं भरताभीष्टपूरणम् ॥ 29 ॥

स्वतः प्रज्ञाततत्वस्य किमु मद्दर्शनेन ते ।
आत्मानं मानुषं मन्ये रामं दशरथात्मजम् ॥ 30 ॥

अनवाप्तमवाप्तव्यं किं मया ते तपोधन ।
मादृशाश्चरितार्थास्स्युस्त्वादृशां कृपयैव हि ॥ 31 ॥

व्यास उवाच –

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्तो दाशरथिना स्मयमानमुखाम्बुजः ।
बद्धाञ्जलिरुवाचेदमगस्त्यो मुनिसत्तमः ॥ 32 ॥

अगस्त्य उवाच –

प्रतारयसि कस्मान्मामेवं वाग्भिः कृपानिधे ।
जाने त्वां जगतां नाथं साक्षान्नारायणं हरिम् ॥ 33 ॥

जगतां मोहनायैव मनुजत्वं तव प्रभो ।
त्वमेव परमं तत्वं त्वं हि नः परमा गतिः ॥ 34 ॥

तव प्रसादं काङ्क्षन्ति चिरात्तपसि शिक्षिताः ।
प्रसाद एव भवतस्सर्वेषां तपसां फलम् ॥ 35 ॥

किमन्यैर्बहुभिर्वाक्यैस्तत्र वासाय राघव ।
प्रार्थनां मे पुरस्कृत्य प्रसादं कर्तुमर्हसि ॥ 36 ॥

व्यास उवाच –

इति तद्वचनं श्रुत्वा सस्मितो रघुनन्दनः ।
उवाच वचनं श्लक्ष्णं स्निग्धगम्भीरनिस्वनः ॥ 37 ॥

श्रीराम उवाच –

एवमप्युच्यमानं मे वचनं श्रोतुमर्हसि ।
यदि नारायणोऽहं स्यां किं न कुर्यां त्वदीप्सितम् ॥ 38 ॥

अनेनैवात्मना तत्र वासो मह्यं न रोचते ।
मनीन्द्र श्रृणु भद्रं ते न हि कुर्यां न ते प्रियम् ॥ 39 ॥

द्वापरान्ते भविष्यामि यदूनामन्वये मुने ।
देवकीगर्भसम्भूतो वासुदेव इति श्रुतः ॥ 40 ॥

कंसाद्भीतेन तत्रापि वसुदेवेन सुव्रत ।
न्यस्तो नन्दव्रजे तत्र गोपवेषमनोहरः ॥ 41 ॥

In Public domain. Digitization Muthulakshmi Research Academy

गाः पालयन् श्रयिष्यामि गोपालाख्यामहं तदा ।
भुवो भारं हरिष्यामि हत्वा दैतेयदानवान् ॥ 42 ॥

तेन गोपालरूपेण तत्राश्रमपदे स्थितः ।
करिष्ये नयनानन्दं भवतो मुनिसत्तम ॥ 43 ॥

तावत्तत्र प्रतीक्षस्व नियमात्तपसि स्थितः ।
तदा सम्पूरयिष्यामि मुने युष्मन्मनोरथम् ॥ 44 ॥

तावदद्यानुजानीहि मां प्रस्थानाय सुव्रत ।
अनुग्राह्यो मया बद्धस्सोऽयं प्रास्थानिकोऽञ्जलिः ॥ 45 ॥

व्यास उवाच –

इत्युक्तस्तेन स मुनिरुवाच रचिताञ्जलिः ।

अगस्त्य उवाच –

त्वं नियन्तासि जगतां नियन्ता तव कः परः ॥ 46 ॥

यथेष्टं क्रियतां राम कृपास्तु परमा मयि ।
मा सत्यसन्ध विस्मार्षीः प्रतिज्ञामधुना कृताम् ॥ 47 ॥

व्यासः –

इति सम्प्रार्थितस्तेन तदनुज्ञामवाप्य सः।
गमनाय मतिं चक्रे सभार्यस्सानुजोऽग्रतः॥ 48 ॥

तदात्वधिज्यं रचयन् शरासनं महानुभावो रघुवंशवर्धनः ।
विहाय तस्याश्रममग्रतश्चरन् सहानुजः पञ्चवटीं विवेश सः ॥ 49

इति भविष्योत्तरे श्रीविष्णुरहस्ये जटायुक्षेत्रमदनगापालमहात्म्ये चतुर्थोऽध्यायः ।

****

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ पञ्चमोऽध्यायः ॥

ततः पञ्चवटीं गच्छन्नन्तरा रघुनन्दनः ।
गृध्रं जटायुषं नाम महाकायं ददर्श सः ॥ 1 ॥

दर्शनादेव तस्याथ जटायुर्हृष्टमानसः ।
वत्सेति मधुरां वाणीं व्याजहार रघूत्तमम् ॥ 2 ॥

रामोऽपि प्रेमगर्भं तद्वचः श्रुत्वा द्रवन्मनाः ।
सुधासिक्त इवास्मार्षीत्तातं दशरथं नृपम् ॥ 3 ॥

पितुस्सखेत्यगस्त्यस्य वचनाद्राघवो विदन् ।
तं ववन्दे महातेजा वृद्धसेवी महाभुजः ॥ 4 ॥

तं वीक्ष्य राघवं श्रीमान् जटायुर्वाक्यमब्रवीत् ।

जटायुः –

सखायं तव तातस्य विद्धि मां रघुनन्दन ॥ 5 ॥

पितुर्वाक्याद्वनं प्राप्तं वेद्मि त्वां सत्यविक्रमम् ।
मया गुप्तो वने ह्यस्मिन् सुसुखं वस राघव ॥ 6 ॥

न कुतश्चिद्भयं तात मया गुप्तस्य ते भवेत् ।
इत्युक्तस्तेन तत्रैव पञ्चवट्यामुवास सः ॥ 7 ॥

कदाचित्तत्र सम्प्राप्तां राक्षसीं लोकनाशनीम् ।
स्वसारं दशवक्त्रस्य कामुकीं कामरूपिणीम् ॥ 8 ॥

रामश्शूर्पणखां नाम चेष्टमानां यथेप्सितम् ।
निरीक्ष्य लक्ष्मणं तस्या वैरूप्यकरणाय सः ॥ 9 ॥

आदिदेश महाराज मुनीनां प्रीतिमावहन् ॥
लक्ष्मणोऽपि तदाज्ञप्तः खड्गमुद्धृत्य रुष्टधीः ।
तत्कर्णनासं चिच्छेद साऽद्रवद्विकृतानना ॥ 10 ॥

In Public domain. Digitization Muthulakshmi Research Academy

ततस्तद्वचसा नुन्ना राक्षसा घोरदर्शनाः ।
दूषणत्रिशिरोमुख्या अभ्ययू रघुनन्दनम् ॥ 11 ॥

राक्षसानां खरादीनां सहस्राणि चतुर्दश ।
अर्धाधिकमुहूर्तेन निन्ये रामो यमक्षयम् ॥ 12 ॥

ततश्शूर्पणखावाक्यात्तन्निशम्य दशाननः ।
दुराधर्षस्य रामस्य सर्वैरपि सुरासुरैः ॥ 13 ॥

प्राणप्रियाहरणान्नान्यत् क्लेशस्य कारणम् ।
इति ज्ञात्वा तद्वचसा मारीचाश्रममभ्यगात् ॥ 14 ॥

तं रामपत्न्याहरणं कार्यमित्यभ्ययाचत ।
मारीचेनापि रामस्य स्मारं स्मारं पराक्रमम् ॥ 15 ॥

एतन्मे दुष्करमिति प्रत्याख्यातोऽपि रावणः ।
त्वयैव मृगरूपेण कार्यमेतन्न संशयः ॥ 16 ॥

अन्यथा त्वां हनिष्यामीत्युक्तस्तेन दुरात्मना ।
भीतस्तथेति मारीचस्सुवर्णहरिणाकृतिः ॥ 17 ॥

चरन्सीताप्रमुखतस्तस्याश्चित्तं जहार सः ।
तयापि बहुशो रामो विचित्रमृगहेतवे ॥ 18 ॥

प्रार्थितो लक्ष्मणं तस्या रक्षणाय नियुज्य सः ।
अधिज्यं चापमादाय क्षणादन्वद्रवन्मृगम् ॥ 19 ॥

ततस्सुदूरे गच्छन्तं मृगं बाणेन जघ्निवान् ।
स मृगोऽपि पतन् प्राह हा सीते लक्ष्मणेति च ॥ 20 ॥

तन्निशम्याति वित्रस्तां जानकीमपि सान्त्वयन् ।
तया तु परुषं तत्तदुक्तो झटिति लक्ष्मणः ॥ 21 ॥

In Public domain. Digitization Muthulakshmi Research Academy

उटजादभिनिष्क्रान्तो राममार्गमनुव्रतः ।
एतस्मिन्नन्तरे सीतामेकां क्रूरो दशाननः ॥ 22 ॥

जहार रामरामेति क्रोशन्तीं कुररीमिव ।
ज्वलन्तीमात्मनाशाय शिखामिव विभावसोः ॥ 23 ॥

ततोऽपहृत्य रामस्य प्रियां जनकनन्दिनीम् ।
गच्छन्तं रावणं वीक्ष्य जटायुरिदमब्रवीत् ॥ 24 ॥

जटायुः –

दुरात्मन्नपहृत्यैनां भार्यां रामस्य धीमतः ।
वने विना कृतां तेन क्व नु गच्छन् विमोक्ष्यसे ॥ 25 ॥

का शक्तिरपहर्तुं ते मयि तिष्ठति जानकीम् ।
पाप निष्ठुर निर्लज्ज तिष्ठ तिष्ठ क्व यास्यसि ॥ 26 ॥

व्यासः –

इत्थं जटायुना रुद्धो रावणो लोकरावणः ।
न्ययुध्यत चिरं तेन रोषसंरक्तलोचनः ॥ 27 ॥

छिन्नच्छत्रं भग्नरथं छिन्नकेयूरचामरम् ।
लूनकर्णं हतहयं कृत्तसूतं दशाननम् ॥ 28 ॥

विधाय गृध्रराजोऽयं क्षणेनैव महामनाः ।
ननाद प्रावृडम्भोदगर्जिताडम्बरस्वनः ॥ 29 ॥

तावत्तत्कर्म विबुधाः प्रशशंसुस्सचारणाः ।
निजघ्नुर्दुन्दुभीन् दिव्यान् कुसुमैस्तमवाकिरन् ॥ 30 ॥

अमृष्यमाणस्तत्कर्म क्रूरकर्मा दशाननः ।
खड्गमादाय गृध्रस्य पक्षौ चिच्छेद सत्वरः ॥ 31 ॥

अथ योद्धुमनीशानं तं विलोक्य जटायुषम् ।
अङ्कनादाय वैदेहीं लङ्कामेव विवेश सः ॥ 32 ॥

In Public domain. Digitization Muthulakshmi Research Academy

अत्रान्तरे मृगं हत्वा मारीचं वीक्ष्य तं हतम् ।
तदुक्त्या व्यथमानात्मा राघवोऽपि न्यवर्तत ॥ 33 ॥

निवर्तमानस्सौमित्रिं मध्ये मार्गं विलोक्य च ।
तेनावेदितवृत्तान्तो भूयो विक्लबतां गतः ॥ 34 ॥

अतिक्रान्तमतिक्रान्तमित्यावेगाकुलेक्षणः ।
सन्दिहानोऽथ वैदेह्या दर्शने तेन संयुतः ॥ 35 ॥

पर्णशालां समासाद्य तत्रादृष्ट्वा प्रियां निजाम् ।
हाहतोऽस्मीति सम्भ्रान्तो व्यचिनोद्विपिनान्तरे ॥ 36 ॥

गृध्रं जटायुषं तत्र वेष्टमानं वनान्तरे ।
अल्पावशेषितप्राणं विलोक्योद्विग्नमानसः ॥ 37 ॥

किमेतत् क्व नु सीतेति पप्रच्छ विहगाधिपम् ।
यथावदादितो वृत्तं तेन चापि न्यवेदि तत् ॥ 38 ॥

अथ तत्कर्मणा तस्य राघवोऽति कृपान्वितः ।
कं ते वरं ददानीति छन्दयामास तं खगम् ॥ 39 ॥

जटायुरब्रवीत्तेन राघवेण प्रचोदितः ।

जटायुरुवाच –

राम त्वद्दर्शनादन्यं वृणुयां कं वरं विभो ॥ 40 ॥

दिवि वा भुवि वा श्रीमंस्त्वत्पदाब्जे मतिर्मम ।
अचञ्चला यथैव स्यात्तथा कुरु कृपां मयि ॥ 41 ॥

इतोऽपि चेद्वरं कञ्चित् प्रदातुं दयसे विभो ।
इतो दक्षिणतः श्रीमन्नगस्त्याश्रममध्यगे ॥ 42 ॥

मदाश्रमे सदावासं यथेच्छसि तथा कुरु ।
कृष्णाद्यास्सरितस्तत्र सप्तनदसङ्गताः ॥ 43 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तन्ममाभीप्सितं राम पूरणीयं त्वया विभो ।
अन्यद्वक्तुं न शक्नोमि संयुगे जहि रावणम् ॥ 44 ॥

सीतां प्राप्य पुनः श्रीमन् राज्यं प्राप्नुहि सुव्रत ।
इत्युक्त्वा रामरामेति तूष्णीमासीत्स गृद्धराट् ॥ 45 ॥

पृच्छतः किं किमित्येव रामस्य विदितात्मनः ।
जहौ प्राणांस्तदा गृध्रः प्रसार्य पुरतो गलम् ॥ 46 ॥

अथ बाष्पपरीताक्षश्शरण्यो रघुनन्दनः ।
पितुस्सखायं तं गृध्रं ददाह विनयान्वितः ॥ 47 ॥

कृत्वौर्ध्वदैहिकं तस्य तस्मै लोकांस्तथाक्षयान् ।
प्राप्यान् प्रपन्नैरददात् कृपासिन्धुस्स राघवः ॥ 48 ॥

अथाग्रतो वने सीतां विचिन्वन् सह लक्ष्मणः ।
सुग्रीवेण समं मैत्रीं कृत्वा ज्ञात्वा च जानकीम् ॥ 49 ॥

हनूमद्वचनाद्रामो वसन्तीं रावणालये ।
बद्ध्वा सेतुं तदाम्बोधौ साकं वानरसेनया ॥ 50 ॥

निहत्य रावणं सङ्ख्ये कुम्भकर्णादिकानपि ।
अग्निप्रवेशतश्शुद्धां सीतां प्राप्य महामनाः ॥ 51 ॥

निशाचराणां राजानं कृत्वा तं च विभीषणम् ।
तस्मै वितीर्य तां लङ्कामथारुह्य च पुष्पकम् ॥ 52 ॥

अयोध्यां प्राविशच्छ्रीमान् पूर्णे वर्षे चतुर्दशे ।
हृष्टैः प्रत्युद्गतः पौरैर्भरतेन च भक्तितः ॥ 53 ॥

ततोऽभिषिक्तस्समये शुभे द्विजैर्वसिष्ठमुख्यैरखिलैश्च नागरैः ।
तथा जनैर्जानपदैश्च पूजितो मुदं प्रपेदे सहसीतयाऽधिकम् ॥ 54

In Public domain. Digitization Muthulakshmi Research Academy

मनुकुलतिलको महानुभावश्चिरतरमेष शशास हृष्टचित्तः ।
सहभरतमुखैस्सहोदरैरप्यनघगुणः पृथिवीं दिवं यथेन्द्रः ॥ 55 ॥

इति भविष्योत्तरे श्रीमद्विष्णुरहस्ये जटायुक्षेत्रमदनगोपालमाहात्म्ये पञ्चमोऽध्यायः

****

॥ अथ षष्ठोऽध्यायः ॥

श्री व्यास उवाच –

दशवर्षसहस्राणि दशवर्ष शतानि च ।
रामो राज्यं पालयित्वा स्वं धाम प्रतिवेदिवान् ॥ 1 ॥

अथ जातु द्वापरान्ते यदूनामन्वये हरिः ।
जायायां वसुदेवस्य देवक्यां प्रादुरास ह ॥ 2 ॥

जातमात्रं शिशुं दृष्ट्वा वसुदेवो महामनाः ।
कंसाद्भीतस्तदा रात्र्यां तञ्च नन्दव्रजे न्यधात् ॥ 3 ॥

पूतनाशकटारिष्टतृणावर्तबकादिमान् ।
न्यवधीत्तत्र राजेन्द्र बाल एव जनार्दनः ॥ 4 ॥

अथ नन्दव्रजे तत्र निवसन् यदुनन्दनः ।
सहितो बलभद्रेण गोपवेषमनोहरः ॥ 5 ॥

मनोरमाभिर्लीलाभिर्गोपीनां प्रीतिमावहन् ।
गाः पालयन् स गोपालस्सह गोपकुमारकैः ॥ 6 ॥

वितेने विविधश्चर्याश्चर्यालोकविलक्षणाः ।
मुष्टिकासुरचाणूरकंसादीन् विनिहत्य सः ॥ 7 ॥

अभिषिच्योग्रसेनं च मधुरायां महामनाः ।

In Public domain. Digitization Muthulakshmi Research Academy

द्वारकायां वसन् पश्चात्पाश्चात्यजलधौ हरिः ॥ 8 ॥

रुक्मिणीसत्यभामाभ्यां मित्रविन्दादिभिस्तथा ।
विहरन् सहजायाभिर्निहत्य नरकं ततः ॥ 9 ॥

राजकन्यास्सहस्राणि षोडशाम्बुजलोचनः ।
तेन रुद्धा निजपुरे पाणौकृत्य रमासखः ॥ 10 ॥

भूमेर्भारायमाणांस्तान् धार्तराष्ट्रान् सपाण्डवः ।
निहत्य परमं धाम जगाम स्वं यदूत्तमः ॥ 11 ॥

अत्रान्तरे दाशरथेर्वरदानमनुस्मरन् ।
अगस्त्यस्सप्तसरितां सङ्गे विश्वमनोहरे ॥ 12 ॥

निजाश्रमपदे देवं ध्यायं ध्यायं महातपाः ।
निन्ये बहूनि वर्षाणि प्रपश्यंस्तन्मयं जगत् ॥ 13 ॥

सत्यसन्धो हरिश्श्रीमान् गोपालाकृतिसुन्दरः ।
अवतीर्णो यदोर्वंशे वसुदेवकुमारकः ॥ 14 ॥

मन्ये प्रादुर्भवेद्दत्तं वरदानमनुस्मरन् ।
इति प्रत्याशया तत्र न्यवात्सीच्चिन्तयन् मुनिः ॥ 15 ॥

एतस्मिन्नन्तरे देवं वासुदेवं जगद्गुरुम् ।
मुक्त्वा भुवं स्वकं धाम प्रपन्नमश्रृणोन्मुनिः ॥ 16 ॥

श्रुत्वा देवं महात्मानं सम्प्राप्तं शाश्वतं पदम् ।
बाष्पायमाणो बहुशः परिम्लानमुखाम्बुजः ॥ 17 ॥

शून्यशून्या दिशः पश्यन् दीर्घदीर्घं विनिश्वसन् ।
अचिन्तयच्चिरं देवं वासुदेवं परात्परम् ॥ 18 ॥

अहो दुर्भागधेयोऽहं सर्वथैव न संशयः ।
यत्सत्यसन्धो भगवान् मह्यं दत्वा वरं महत् ॥ 19 ॥

In Public domain. Digitization Muthulakshmi Research Academy

इदं मदाश्रमपदं नालञ्चक्रे जगत्पतिः ।
दुर्भगोऽहं दुराचारो दुर्मेधा नात्र संशयः ॥ 20 ॥

प्रायः कृपानिधेश्चापि मां दृष्ट्वा करुणाहरेः ।
मन्ये शुष्यत्यभाग्यान्मे स्रवन्तीव तपागमे ॥ 21 ॥

किं करोमि क्व गच्छामि कं नु वाद्य प्रसादये ।
कस्याग्रतो रोदिमि वा को वा मां परिपालयेत् ॥ 22 ॥

पालयत्येव मां देवश्शरणागतवत्सलः ।
इति निश्चितवांस्तेन हन्ताद्यास्मि प्रतारितः ॥ 23 ॥

एवं स भगवानेव मिथ्यावादी भवेद्यदि ।
किं दूषणं वदिष्यामः प्राकृतान् मनुजान् प्रति ॥ 24 ॥

धिङ्मां मन्दधियं योऽहं रामो द्विर्नाभिभाषते ।
इति तद्वचने रूढप्रत्ययस्तेन वञ्चितः ॥ 25 ॥

अथवा भगवान् साक्षात् करुणामृतसागरः ।
स सत्यसन्ध एव स्यात्ते वयं भाग्यदुर्गताः ॥ 26 ॥

भगवद्दिव्यकरुणाचन्द्रिकैषा निरर्गलम् ।
प्रसरन्ती छाद्यतेऽहो मद्दौर्भाग्यबलाहकैः ॥ 27 ॥

किं कुर्याद्भगवानस्मत्कर्मणे करुणानिधिः ।
अनाद्यविद्यासंछन्ना मज्जामो भवसागरे ॥ 28 ॥

अद्य श्वो वा समेयात्स भगवानिति सन्तता ।
प्रत्याशापि गता दूराद्यद्गतस्स परं पदम् ॥ 29 ॥

सत्यसन्धैर्महाभागैरपि यत्तु प्रतिश्रुतम् ।
अभाग्यस्तन्न विन्देत नामापराध्यन्ति ते ततः ॥ 30 ॥

In Public domain. Digitization Muthulakshmi Research Academy

क्वाहं क्षुद्रमतिः कुत्र भगवान् स जगत्पतिः ।
इच्छेन्मदाश्रमे वस्तुं कस्य हेतोर्धिगद्य माम् ॥ 31 ॥

क्व तादृशं भागधेयं मम क्षुद्रमतेर्भवेत् ।
न सुग्रीवो न शबरी नाहमस्मि विभीषणः ॥ 32 ॥

धीमान् यद्यभविष्यं प्राक् प्रार्थयिष्येत दैवतम् ।
मदाश्रमगतं रामं गृहीत्वा चरणाम्बुजे ॥ 33 ॥

प्रत्याख्यातुं च नाशक्ष्यच्छरणागतवत्सलः ।
प्रपन्नं चरणद्वन्द्वे मां तदा रघुनन्दनः ॥ 34 ॥

निधिं दैववशाल्लब्ध्वं हित्वान्धतमसस्थितः ।
निधिर्निधिरिति भ्रान्तो विचिनोमि धिगद्य माम् ॥ 35 ॥

मन्ये रघुपतेस्तस्य कृपा मयि न वास्तवी ।
यत्तदैव न जग्राह रचितां प्रार्थनां मया ॥ 36 ॥

पश्चादवतरिष्यामीत्याह यत्तत्प्रतारणम् ।
अन्यथाऽत्र हरिः श्रीमान्नैव प्रादुर्भवेत् कुतः ॥ 37 ॥

दिशो मे सम्प्रणश्यन्ति तं विचिन्तयतो मम ।
न स्वास्थ्यं भजते चित्तं किं करिष्याम्यहं पुनः ॥ 38 ॥

श्रीव्यास उवाच –

हरिदर्शनवैधुर्याद्यावद्दूनमना मुनिः ।
मुहुश्चिन्तयते तावन्नारदोऽगात्तदाश्रमम् ॥ 39 ॥

तमुपागतं मुनिमुदात्तवर्चसं धुरि नारदं समभिवन्द्य भक्तितः ।
अभिपूज्य विष्टरतले निषाद्य तं मुनिरेष साञ्जलिरुपास्त सादरम् ॥40॥

इति भविष्योत्तरे श्रीविष्णुरहस्ये जटायुक्षेत्रमदनगोपालमाहात्म्ये षष्ठोऽध्यायः

****

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ सप्तमोऽध्यायः ॥

श्रीव्यास उवाच –

अथ तं दूनहृदयं प्राञ्जलिं पुरतः स्थितम् ।
अगस्त्यमभिवीक्ष्येदं वदति स्म स नारदः ॥ 1 ॥

श्रीनारद उवाच –

विदितं चिन्तितं सर्वं महर्षे भवतो मया ।
जहीहि चिन्तां शान्तात्मंश्चेतो दौर्बल्यकारणम् ॥ 2 ॥

यदुत्साहेन संसिध्येन्नहि तच्चिन्तया क्वचित् ।
चिन्ता नाम महान् व्याधिर्जरयत्यञ्जसा नरम् ॥ 3 ॥

किं प्राकृत इव त्वं च विक्लबश्चेद्ब्रवीम्यहम् ।
न हि प्रतारयेज्जातु भगवांस्त्वां दयानिधिः ॥ 4 ॥

न हि तत्करुणायाश्च न पात्रमसि सुव्रत ।
अचिरादेव ते ब्रह्मन् हरिश्चक्षुष्पथे भवेत् ॥ 5 ॥

एवं विषयसङ्क्षुब्धचित्तान् भक्तान् जनार्दनः ।
प्रायः परीक्षतेऽमीषां स्थैर्यजिज्ञासया मुने ॥ 6 ॥

न कदाचिदपि श्रीशो विजह्यात् सत्यसन्धताम् ।
एकस्य हेतोर्भवतो मा ग्लासीर्मुनिसत्तम ॥ 7 ॥

न हि वैषम्यनैर्घृण्ये विद्येते परमात्मनः ।
कर्मानुरूपं जन्तूनां ददाति फलमच्युतः ॥ 8 ॥

त्वादृशामपि देवस्य तस्य माया दुरत्यया ।
को वेद तस्य सङ्कल्पं देवैरपि दुरन्वयम् ॥ 9 ॥

आदध्महेऽञ्जलिं मूर्ध्नि महिम्नेऽस्य जगत्पतेः ।
यत्र मुह्यन्ति सर्वेऽपि ब्रह्माद्याः किं परे जनाः ॥ 10 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तदद्य परमर्षे त्वं समाहितमना मनाक् ।
पिनाकिनं समुद्दिश्य तपश्चर तपोनिधे ॥ 11 ॥

स तु त्वत्तपसा प्रीतस्समतीतेऽह्नि सप्तमे ।
उपदेक्ष्यति ते मन्त्रं शुभदं रामतारकम् ॥ 12 ॥

तेन मन्त्रेण भक्त्या त्वं पुनस्सप्तदिनान्यहो ।
क्षेत्रे जटायुषः श्रीमंस्तपः कुरु तपोधन ॥ 13 ॥

प्रीतस्त्वत्तपसा देवश्शम्भुस्त्वन्नेत्रगोचरः ।
पूरयिष्यति तेऽभीष्टं मा शुचो मुनिसत्तम ॥ 14 ॥

वैक्लब्यं तव वीक्ष्याहमुपायं वक्तुमागतः ।
गमिष्यामि यथाभीष्टमनुजानीहि मां मुने ॥ 15 ॥

श्रीव्यास उवाच –

इत्युदीर्य तदा वीणां वादयन्नारदो मुनिः ।
जगौ नारायणं चित्रैः स्तोत्रैः श्रोत्रमनोहरैः ॥ 16 ॥

तं तदा प्रस्थितं दृष्ट्वा लोपामुद्रापतिर्मुनिः ।
कृताञ्जलिरुवाचेदं वचस्सानन्दगद्गदम् ॥ 17 ॥

अगस्त्य उवाच –

भवान्धतमसभ्रान्तानुद्धर्तुं ज्ञानदुर्गतान् ।
भानूयते भवानेको धन्योऽस्मि तव दर्शनात् ॥ 18 ॥

चिन्ता मोहपरीतं मां वाङ्मयैस्त्वं सुधामयैः ।
उज्जीवयस्यार्तबन्धो त्वत्पादौ शरणं मम ॥ 19 ॥

व्यास उवाच –

इत्यभिष्टूयमानोऽयं तेनागस्त्येन नारदः ।
उत्पपात नभोमध्यं राकाचन्द्र इवापरः ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

गते तु नारदे श्रीमानगस्त्यस्तद्वचो मुहुः ।
स्मारं स्मारं प्रहृष्टात्मा तपस्तप्तुं प्रचक्रमे ॥ 21 ॥

नित्यं त्रिषवणस्नायी निराहारो जितेन्द्रियः ।
निपीड्य पादाङ्गुष्ठेन मेदिनीं संश्रितव्रतः ॥ 22 ॥

नासाग्रन्यस्तनयनो वक्षोविष्टभ्यचात्मवान् ।
ध्यायन्नुमापतिं देवं तपस्तेपे सुदुश्चरम् ॥ 23 ॥

अथ सप्तसु यातेषु दिनेषु शशिशेखरः ।
प्रसन्नस्तस्य तपसा प्रादुरासीदुमासखः ॥ 24 ॥

तमग्रतो विलोक्याथ प्रत्युत्थाय कृताञ्जलिः ।
प्रणनाम मुहुर्भूमौ हर्षनिर्भरमानसः ॥ 25 ॥

प्रणतं तं समुद्वीक्ष्य शङ्करस्तुष्टमानसः ।
अलं श्रान्तोऽसि तातेति मूर्ध्नि पस्पर्श पाणिना ॥ 26 ॥

तावत्सुधारसासिक्त इव हृष्टतनूरुहः ।
मुनिस्तत्करसंस्पर्शाद्भेजे कामपि निर्वृतिम् ॥ 27 ॥

अथ स्मित्वाऽब्रवीद्देवः को नु तेऽभीप्सितो वरः ।
वृणु तत्ते प्रदास्यामि मुञ्च तन्द्रीमनिन्दित ॥ 28 ॥

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति सम्पदः ॥ 29 ॥

व्यास उवाच –

इत्युमापतिनागस्त्यश्चोदितो मुनिसत्तमः ।
कृताञ्जलिर्जगादेदं हर्षबाष्पपरिप्लुतः ॥ 30 ॥

अगस्त्य उवाच –

वरः कोऽपि न मेऽभीष्टो भगवद्दर्शनादृते ।

In Public domain. Digitization Muthulakshmi Research Academy

यथारामं प्रपश्येयं तथा कुरु कृपां मयि ॥ 31 ॥

श्रीव्यास उवाच –

इति तेनार्थितो देवश्शङ्करो लोकशङ्करः ।
उवाच वचनं तोयं समुपस्पृश्यतामिति ॥ 32 ॥

उपस्पृष्टोदके तस्मिन्नगस्त्ये पार्वतीपतिः ।
उपादिक्षत्तदा तस्मै तारकं मन्त्रमुत्तमम् ॥ 33 ॥

श्रुतमात्रान्मनो तस्मात्तस्य श्रीरभ्यवर्धत ।
संसर्गादिव तिग्मांशोश्चन्द्रस्य पृथिवीपते ॥ 34 ॥

मन्त्रराजप्रभावेन शरत्सूर्यमिवोज्ज्वलम् ।
अभिवीक्ष्य मुनिं प्रीतो जगाद शशिशेखरः ॥ 35 ॥

रुद्र उवाच –

दुर्लभं वर्षसाहस्रैरिदं रामतारकम् ।
उपादिक्षं महामन्त्रं कृपापरवशो मुने ॥ 36 ॥

मन्त्राणां परमो मन्त्रस्सोऽयं मुनिवर त्वया ।
लब्धोऽद्य दुर्लभं लोके नान्यत्ते भविता क्वचित् ॥ 37 ॥

इदं रहस्यं परममिदं लक्ष्मीप्रदं नृणाम् ।
इदमायुष्करं श्रीमन्निदं पुत्राभिवृद्धिदम् ॥ 38 ॥

इदं राज्यप्रदं दिव्यमिदं सर्वेष्टसाधनम् ।
इदं रमापतेः प्रीतिमभिवर्धयति ध्रुवम् ॥ 39 ॥

अस्मात्प्रियतमो मन्त्रो नान्योऽस्ति श्रीपतेर्मुने ।
नित्यमस्मिन्महामन्त्रे महतीं भक्तिमुद्वह ॥ 40 ॥

तथामय्यपि विश्वासं महान्तं कुरु मन्त्रदे ।
उदास्ते यो गुरुं तस्य मन्त्रो न फलति क्वचित् ॥ 41 ॥

In Public domain. Digitization Muthulakshmi Research Academy

यथा देवे तथाचार्ये भक्तिः कार्या विजानता ।
किमन्यदुपदेष्टव्यं तव सर्वं विजानतः ॥ 42 ॥

इतो गव्यूतिमात्रे त्वं क्षेत्रे रम्ये जटायुषः ।
तटिन्यां निर्मलाख्यायां स्नात्वा तत्र धृतव्रतः ॥ 43 ॥

ध्यायन् रघुपतिं देवं शरणागतवत्सलम् ।
तपश्चर धृढं सप्त दिनानि मुनिसत्तम ॥ 44 ॥

अथ तत्र जगन्नाथो हरिः प्रादुर्भविष्यति ।
न कश्चिदत्र सन्देहस्समुत्तिष्ठ तपोधन ॥ 45 ॥

इममेवार्थमुद्दिश्य वरं प्रादाज्जटायुषे ।
तेन संप्रार्थितः पूर्वं रामो राजीवलोचनः ॥ 46 ॥

भवतश्च जटायोश्चाप्याभीष्टपरिपूर्तये ।
इतोऽष्टमे दिने श्रीमान्देवः प्रादुर्भविष्यति ॥ 47 ॥

अन्यत्र युगसाहस्रैः क्षेत्रे यत्साध्यते फलम् ।
एकेनाह्नैव तत्सर्वं नरैः क्षेत्रेऽत्र साध्यते ॥ 48 ॥

तस्मादत्त्रैव विधिवज्जटायुक्षेत्रमण्डले ।
तपश्चराद्य भद्रन्ते यास्याम्यहमितो मुने ॥ 49 ॥

श्रीव्यास उवाच –

इत्युदीर्य स भूतेशो भक्त्या तेनाभिवन्दितः ।
अत्रैवास्व महादेवेत्यथ सम्प्रार्थितश्शिवः ॥ 50 ॥

अवात्सीदृषिभिस्तत्र पूजितस्स दयानिधिः ।
प्रायस्त्वयापि दृष्टस्स्यादद्यापि परिदृश्यते ॥ 51 ॥

अगस्त्यक्षेत्रमध्येऽस्मिन् भजतां हर्षवर्धनः ।
अगस्त्येश्वरनाम्नैव ख्यातोऽभूत् स महेश्वरः ॥ 52 ॥

In Public domain. Digitization Muthulakshmi Research Academy

पुरहरपरमाज्ञया मुनीन्द्रस्सरभसमेत्य वनं ततो जटायोः ।
सरिति रचितमज्जनस्स तस्यां परममध्यात्कुतुकं तपोभि तप्तुम् ॥ 53 ॥

इति भविष्योत्तरे श्रीविष्णुरहस्ये श्रीमज्जटायुक्षेत्रमदनगोपालमहात्म्ये सप्तमोऽध्यायः

****

॥ अथ अष्टमोऽध्यायः ॥

श्रीवेदव्यास उवाच –

दर्भेष्वथ समासीनो धृतदर्भो महामनाः ।
पवित्रपाणिर्नासाग्रन्यस्तनेत्रस्तपोधनः ॥ 1 ॥

विष्टब्धहृदयश्श्रीमान् प्राणानायम्य वाग्यतः ।
कृतस्वाङ्गकरन्यासो ध्यायन् देवं रघूत्तमम् ॥ 2 ॥

जजाप परमं जप्यं रामतारकमादृतः ।
सर्वेन्द्रियाणि सहसा सन्नियम्य यतव्रतः ॥ 3 ॥

अनाहारोऽप्रमत्तोऽयं पश्यन् राममयं जगत् ।
तपस्तेपे सुदुर्धर्षस्सप्तरात्रं सुनिश्चलः ॥ 4 ॥

अथ प्रसन्नो भगवांस्तपसा तस्य विस्मितः ।
श्रीमतः परमव्योम्नस्तं मोदयितुमभ्यगात् ॥ 5 ॥

विश्वक्सेनोऽग्रतस्तस्य हस्तालम्बं ददौ स्वयम् ।
एषस्समर्पयामास विनयान्मणिपादुके ॥ 6 ॥

विमलोत्कर्षिणीज्ञानक्रियायोगा तथैव च ।
प्रह्वा सत्या तथेशानाऽनुग्रहा च तथेश्वरी ॥ 7 ॥

प्रचलत्किङ्किणीमञ्जुशिञ्जितध्वनिरञ्जितैः ।
कराब्जैर्वीजयामासुरभितश्चामराण्यलम् ॥ 8 ॥

In Public domain. Digitization Muthulakshmi Research Academy

शेषः पूर्णेन्दुसङ्काशं छत्रं जग्राह भास्वरम् ।
द्वारपालाश्च चण्डाद्यास्स्वर्णदण्डान् दधुर्मुदा ॥ 9 ॥

भगवन् विजयस्वेति नित्या मुक्तास्तदाऽस्तुवन् ।
दिव्याः कन्या महोदारं परमात्मानमव्ययम् ॥ 10 ॥

सपक्षमिव हेमाद्रिं गरुत्मन्तं रमासखः ।
आरुरोहाथ भगवान् शरणागतवत्सलः ॥ 11 ॥

कुमुदादिगणाध्यक्षचोदितास्सायुधास्तदा ।
दिव्यसेना व्यजृम्भन्त तदद्भुतमिवाभवत् ॥ 12 ॥

कोटिशः पुण्डरीकेन्दुनिभाश्चत्र परम्पराः ।
कोटिशो वीज्यमानानि चामराणि च रेजिरे ॥ 13 ॥

वैजयन्त्योऽप्यसङ्ख्याता मन्दमारुतकम्पिताः ।
ननृतुः प्रमदेनेव नानावर्णविभासुराः ॥ 14 ॥

असङ्ख्यादिव्यनागेन्द्रानिस्सङ्ख्यादिव्यवाजिनः ।
असङ्ख्येया विमानाश्च सर्वतोव्यलसन्नृप ॥ 15 ॥

सर्वे दिव्याम्बरधरास्सर्वे कुण्डलमण्डिताः ।
सर्वे सम्पूर्णतारुण्यास्सर्वे परिघबाहवः ॥ 16 ॥

सर्वे पूर्णेन्दुवदनास्सर्वे कमललोचनाः ।
सर्वे किरीटमकुटकटकाङ्गदभूषणाः ॥ 17 ॥

नाकुण्डली नामकुटी नास्रग्वी नाल्पभोगवान् ।
नानुरूपो नाविनीतस्तत्रैकोऽप्यभवन्नृप ॥ 18 ॥

प्रस्थिते सर्वलोकानां शरण्ये कमलासखे ।
प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥ 19 ॥

वीणावेणुमृदङ्गौघपटहानकगोमुखान् ।
दुन्दुभिंश्च महोत्साहा वादयन्ति स्म देवताः ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तेन स्निग्धगभीरेण नादेन महता नृप ।
ब्रह्माण्डभाण्डमखिलं सम्मूर्च्छितमिवाभवत् ॥ 21 ॥

अथ तत्राश्रमपदे मुनीन्द्रस्स तपश्चरन् ।
शुश्रावाश्रुतपूर्वं तं दिव्यदुन्दुभिनिस्वनम् ॥ 22 ॥

दिव्यकाहलनिर्घोषान् सर्वश्रुतिमनोहरान् ।
दिव्यतूर्यनिनादांश्च श्रुत्वाऽगस्त्यस्समुत्थितः ॥ 23 ॥

कृपया भगवानद्य नूनं प्रादुर्भविष्यति ।
इति सर्वा दिशः श्रीमान् प्रदिशश्च व्यलोकत ॥ 24 ॥

उन्नम्य वदनं शश्वद्दिवि दत्तविलोचनः ।
कदा द्रक्ष्यामि देवं तमित्यौत्सुक्यं परं दधौ ॥ 25 ॥

महर्षेरुत्सुकस्यैवं दिवं समभिपश्यतः ।
रवीन्दुकोटिसङ्काशं दिव्यं ज्योतिरदृश्यत ॥ 26 ॥

उन्निद्ररोमा तज्ज्योतिरद्भुतं वीक्ष्य भूपते ।
दिवं भुवं दिशं वापि नाज्ञासीन्मुनिपुङ्गव ॥ 27 ॥

कमप्यानन्दमापेदे बाष्पपर्याकुलेक्षणः ।
वक्तुं द्रष्टुं श्रोतुमपि तद्वृत्तं को नु शक्नुयात् ॥ 28 ॥

दिवि भास्करकोटीनां कोटयो युगपद्यदि ।
उदयेरंस्तदप्यस्य तेजस्तेजोम्बुधेः कणः ॥ 29 ॥

जगौ किमपि सानन्दं जहास च पुनः पुनः ।
पुनः पुनर्ननर्तैष पुनस्तूष्णीं स्थितः क्षणम् ॥ 30 ॥

क्षणान्निमीलिताक्षोऽभूत् क्षणं विस्फारितेक्षणः ।
क्षणं मत्त इवोत्पश्यन् क्षणमुन्मत्तवच्चरन् ॥ 31 ॥

ददर्श भुवनं सर्वं स मुनिर्भगवन्मयम् ।

प्राञ्जलिः प्रणनामाथ तेजो दृष्ट्वा तदद्भुतम् ॥ 32 ॥

ततः क्षणादग्रभुवि ध्वजोल्लसत्तुरङ्गदन्तीन्द्रविमान-कोटिभिः ।
मनोज्ञमत्यद्भुतदर्शनं बालं ददर्श नित्यं निरवद्यमुत्सुकः ॥ 33 ॥

समुच्चलच्चामरफेनदन्तुरं स्फुटातपत्राब्जपरं परान्तरम् ।
ध्वनन्महादुन्दुभिमेघसुन्दरं स्फुरत्प्रवालामलमौक्तिकोत्करम् ॥34॥

तुरङ्गगम्भीरतरङ्गबन्धुरं विमानराजोडुपकोटिसङ्कुलम् ।
महागजाद्रिव्रजदन्तुरान्तरं महाप्सरोलोचनमीनसेवितम् ॥ 35 ॥

दिवोऽवतीर्णां सुरनिम्नगां पुरा सधर्मिणीं स्वामनुकर्तुमिच्छया ।
दिवस्तथैवावतरन्तमम्बुधिं मुनिस्तदाऽशङ्कत तद्बलं हरेः ॥ 36 ॥

तदन्तरेऽत्युच्च हिरण्यभूमिभृन्निषण्णगम्भीरघनाघन-च्छविम् ।
समुच्चलत्पक्षमरुद्विधूनिताश्रितार्तिपक्षीन्द्रमहांस भूस्थितम् ॥ 37 ॥

अनुग्रहाद्युज्वलदिव्यसुन्दरीकरारविन्दोच्चलचामरोत्करैः ।
प्रवीज्यमानं धुरि दिव्यवन्दिभिस्स्तुतापदानशरणार्थिनां धनम् ॥38॥

महानुभावं शरदिन्दुनिर्मलस्मितोल्लसद्दिव्यकपोल-सुन्दरम् ।
शरत्प्रफुल्लाम्बुजचारुलोचनं विनर्तितभ्रूयुगन्दरालिकम् ॥ 39 ॥

स्फुरन्महारत्नकिरीटकुण्डलं प्रकाशमानाङ्गदमञ्जुलोर्मिकम् ।
महार्हकाञ्चीगुणनूपुरादिमस्फुरन्मणीभूषणकोटिभूषितम् ॥ 40 ॥

सितांशुबालाभललाटपट्टिकासमुल्लसत्कुङ्कुमचित्रकाङ्कुरम् ।
शरद्रविस्पर्धिमणीन्द्रलक्षणप्रफुल्लमालापरिपूर्णवक्षसम् ॥ 41॥

सशङ्खचक्राब्जगदासमुल्लसच्चतुर्भुजं नित्ययुवानमच्युतम् ।
दधानमङ्के तटिदुल्लसत्प्रभां प्रियां जगन्मातरमब्धिकन्यकाम् ॥42॥

महार्घलावण्यसरित्तनूर्मिकावलित्रयावर्तितनाभिसुन्दरम् ।
उदारपीताम्बरभूषणोल्लसन्महेभहस्तोपमितोरुभासुरम् ॥ 43॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रियश्श्रियं सर्वजगत्पतिं हरिं परात्परं निर्मलमादिपूरुषम् ।
उदारगम्भीरगुणाकरं पुरो ददर्श नाराणमागतं मुनिः ॥ 44॥

इति भविष्योत्तरे श्रीविष्णुरहस्ये जटायुक्षेत्रमदनगोपालमाहात्म्येऽष्टमोऽध्यायः

****

॥ अथ नवमोऽध्यायः ॥

श्रीव्यास उवाच –

अथाग्रतो हरिं वीक्ष्य नारायणमनन्यधीः ।
मुनिरानन्दभाष्पाम्बुपरिपूरितलोचनः ॥ 1 ॥

जटामकुटविन्यस्तप्रार्थनाञ्जलिकुड्मलः ।
प्रणनाम मुहुर्भूमौ परिफुल्लतनूरुहः ॥ 2 ॥

गरुडादवतीर्याथ शेषेणार्पितपादुकः ।
देवस्सूत्रवतीनाथदत्तहस्तावलम्बनः ॥ 3 ॥

विमलादिपराम्बोजचलच्चामरवीजितः ।
पूर्णेन्दुबिम्बदायादपाण्डुरच्छत्रसुन्दरः ॥ 4 ॥

साकं लक्ष्म्या जगद्धात्र्या धरण्या चापि नीलया ।
शरण्यस्सर्वलोकानामुदारगुणसागरः ॥ 5 ॥

उपेत्य निकटं तस्य प्रणतं मुनिसत्तमम् ।
चरमाङ्गे तमस्प्राक्षीच्छन्तमेनैष पाणिना ॥ 6 ॥

समग्न इव दुग्धाब्धौ सुधाभिरिव सेचितः ।
कर्पूरैरिवलिप्ताङ्गस्तत्करस्पर्शनादभूत् ॥ 7 ॥

चिराद्दृष्टं तमालोक्य मुनीन्द्रं तपसा कृशम् ।
श्रीमन्नारायणो देवः करुणानिधिरब्रवीत् ॥ 8 ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीभगवानुवाच –

तोषितस्तपसा तेऽद्य प्रसन्नहृदयो मुने ।
चिराभिलषितं यत्तत्पूरणायागतोऽस्म्यहम् ॥ 9 ॥

तपसासि परिश्रान्तो मत्कृते मुनिसत्तम ।
सोऽहं तवेप्सितं दास्ये जवादुत्तिष्ठ सुव्रत ॥ 10 ॥

यथा तारकमन्त्रेण सिद्धिस्स्यादविलम्बितम् ।
न तथा मन्त्रसाहस्रै राजन् मच्चिन्तितैरपि ॥ 11 ॥

य एतत्तारकं मन्त्रं जपेन्नियममास्थितः ।
दास्ये तदीप्सितं सर्वमिति मे निश्चयो महान् ॥ 12 ॥

रामो दाशरथिः पूर्वं यस्त्वयास्मि विलोकितः ।
स एवाहं प्रतिज्ञातं वरं दातुमिहागतः ॥ 13 ॥

तदैवापूरयिष्यं चेद्वत्स तेऽभीप्सितं मुने ।
दुर्लभो मन्त्रराजोऽयमभविष्यत्तवेत्यहम् ॥ 14 ॥

उपैक्षिषि मनाक् तात माज्ञासीरन्यथा क्वचित् ।
भक्तादपि प्रियतमो विद्यते मम नेतरः ॥ 15 ॥

तदुत्तिष्ठ सुनिर्वृत्तं तपसा ते प्रयोजनम् ।
गृहाण परमव्यग्रः किमन्यत्त्वदभीप्सितम् ॥ 16 ॥

श्रीव्यास उवाच –

इत्यनुग्रहसान्द्रान्तां नारायणवचस्सुधाम् ।
निपीय कर्णाञ्जलिना मुनिस्साञ्जलिरब्रवीत् ॥ 17 ॥

अगस्त्य उवाच –

नमस्ते पूण्डरीकाक्ष नमस्ते जगतां पते ।
नमस्तेऽस्तु रमानाथ नमस्ते भक्तवत्सल ॥ 18 ॥

In Public domain. Digitization Muthulakshmi Research Academy

वदन्ति श्रुतयस्त्वां हि जगज्जन्मादिकारणम् ।
सत्यं ज्ञानमनन्तं च ब्रह्मानन्दमयं विभो ॥ 19 ॥

त्वं हि धाता विधाता च त्वमिन्द्रस्त्वं चतुर्मुखः ।
त्वमाकाशो दिशश्चापि त्वं प्राणोऽसि सतां पते ॥ 20 ॥

त्वदायत्तमिदं सर्वं त्वयि न्यस्तभरा वयम् ।
परात्परतरस्त्वं हि ब्रह्माद्यास्तव किङ्कराः ॥ 21 ॥

यश्चक्षुषि य आदित्ये पुरुषे चापि तिष्ठति ।
स्वतोऽपहतपाप्मा च स खलु त्वं जगत्पतिः ॥ 22 ॥

त्वां प्राप्य न विवर्तन्ते ज्ञानिनस्त्वदुपासकाः ।
भजन्त्यनवधिं दिव्यमानन्दं त्वत्पदे स्थिताः ॥ 23 ॥

त्वद्भयाद्वहते वायुरुदेति त्वद्भयाद्रविः ।
अग्नीन्द्रमृत्यवस्त्वत्तो भीता धावन्ति माधव ॥ 24 ॥

नाभिलष्यामि भवतो दर्शनादपरं वरम् ।
त्वत्पादपरिचर्यैकसक्तं मेऽस्तु मनस्सदा ॥ 25 ॥

यत्त्वया प्राक्प्रतिज्ञातं त्वदाश्रमपदे तदा ।
बालगोपालवेषेण निवत्स्यामीति वत्सल ॥ 26 ॥

तत्पारय कृपासिन्धो मदाश्रमपदे वसन् ।
शेषमायुश्च नेष्यामि त्वत्पदाब्जार्चनादहम् ॥ 27 ॥

अनन्यशरणानान्त्वं प्रदत्से यां गतिं विभो ।
न कथं ता प्रपन्नाय मह्यमन्ते प्रदास्यसि ॥ 28 ॥

अलमेतावता श्रीमन् प्रार्थनेन जगत्पते ।
अकिञ्चनोऽनन्यगतिस्त्वामेव शरणं वृणे ॥ 29 ॥

श्रीव्यास उवाच -

In Public domain. Digitization Muthulakshmi Research Academy

इति प्रपन्नं पदयोस्तमुद्वीक्ष्य तपोधनम् ।
विवशः कृपया दीनबन्धुर्नारायणोऽब्रवीत् ॥ 30 ॥

श्रीभगवानुवाच –

सत्यमेव त्वया प्रोक्तं नात्र कश्चन संशयः ।
विष्वक्सेनमुखानेतान् मामकीनान् विलोकय ॥ 31 ॥

कच्चिद्दृष्टं त्वया श्रीमन् सर्वं मद्वैभवं मुने ।
दुर्दर्शमितरैरेतत् कृपया तव दर्शितम् ॥ 32 ॥

नित्याञ्जलिपुटा हृष्टा नम इत्येव वादिनः ।
यथैते नित्यसाम्राज्ये वसन्त्यानन्दनिर्भराः ॥ 33 ॥

एवमेव त्वमप्यन्ते परमानन्दनिर्भरः ।
आस्थितो नित्यशेषत्वं भविष्यसि न संशयः ॥ 34 ॥

साम्प्रतं प्रतिमामेतां गोपवेषमनोहराम् ।
पदात्मिकां गृहाण त्वं नित्यमेनां समर्चय ॥ 35 ॥

श्रीव्यास उवाच –

इत्युक्त्वा भगवान् दिव्यां सुरूपां प्रतिमां मुनेः ।
गोपालवेषरुचिरां श्रीभूमीभ्यां समन्विताम् ॥ 36 ॥

प्रदाय कृपयाविष्टः पुनरेवं वचोऽब्रवीत् ।

श्री भगवानुवाच –

अहमेव मुने सैषा प्रतिमा नित्यमङ्गला ॥ 37 ॥

एनामाराधयाजस्रमेनां ध्यातुमिहार्हसि ।
अन्ते त्वं मन्मय श्रीमन्नामेवैष्यस्यसंशयः ॥ 38 ॥

श्रीव्यास उवाच –

इत्युक्त्वा भगवद्दत्तं दिव्यं तं विग्रहं हरेः ।
पूर्णेन्दुबिम्बवदनं कमलायतलोचनम् ॥ 39 ।

In Public domain. Digitization Muthulakshmi Research Academy

बर्हिबर्हकृतोत्तंसं वेणुवादनलोलुपम् ।
स्फुरत्किरीटवलयकटिसूत्रादिशोभितम् ॥ 40 ॥

दधानमूर्ध्वबाहुभ्यां पाञ्चजन्यसुदर्शने ।
कन्दर्पकोटिलावण्यं विलोक्य मुनिसत्तमः ॥ 41 ॥

सोऽयं मदनगोपालो मया लब्धो हरिश्चिरात् ।
अहो भाग्यमहो भाग्यमहो धन्योऽस्म्यहं चिरात् ॥ 42 ॥

इति संहृष्टसर्वाङ्गः कृताञ्जलिपुटो हरिम् ।
अब्रवीत् करुणापाङ्गैर्वीक्षमाणं श्रिया सह ॥ 43 ॥

अगस्त्य उवाच –

नाथ त्वत्कृपया धन्योऽस्म्यन्यन्नास्ति मदीप्सितम् ।
यदाज्ञापयसि श्रीमंस्तत्करिष्ये कृपानिधे ॥ 44 ॥

श्रीव्यास उवाच –

इति विज्ञापयन्तं तमगस्त्यं वीक्ष्य माधवः ।
ददर्श वदनं देव्यास्सस्मितं चन्द्रसुन्दरम् ॥ 45 ॥

तदभिप्रायमाज्ञाय सुस्मेरवदनाम्बुजा ।
जगतां जननी देवी मनीन्द्रमिदमब्रवीत् ॥ 46 ॥

श्रीरुवाच –

तातत्वत्तपसा तुष्टो देवः प्रादत्त ते वरम् ।
ममापि च वचः किञ्चिद्वत्स श्रोतुमिहार्हसि ॥ 47 ॥

यद्योजनत्रयं ह्येतत्त्वदाश्रमपदं मुने ।
तदन्तर्गतं तात क्षेत्रं चैतज्जटायुषः ॥ 48 ॥

सरितो निर्मलाख्यायाः प्राच्यां दिशि तपोधन ।
विमानेऽत्र प्रतिष्ठाप्या प्रतिमैषेति मे मतम् ॥ 49 ॥

रावणेन चिरं युध्वा मदर्थं त्यक्तजीवितः ।
जटायुर्गृध्रराजोऽयं स्नुषेति मयि सादरः ॥ 50 ॥

अकृत्वा गृध्रराजस्य तादृशीं प्रत्युपक्रियाम् ।
दूयेऽद्यापि मुनिश्रेष्ठ तत्त्वां सञ्चोदयाम्यहम् ॥ 51 ॥

य इदानीं त्वया लब्धो दिव्यमङ्गलविग्रहः ।
एष तस्य क्षेत्रेऽस्मिन्नवश्यं पूज्यतां चिरम् ॥ 52 ॥

अनेन तुष्टो भविता जटायुर्नात्र संशयः ।
(प..)श्य सम्प्रति शेषत्वसाम्राज्ये सैष भासते ॥ 53 ॥

अस्मै वरश्च देवेन वासायात्र प्रतिश्रुतः ।
अविरुद्धं तवाप्येतत्कर्तव्यं वचनं मम ॥ 54 ॥

भवतश्च जटायोश्च देवस्य च ममापि च ।
कर्मणानेन सन्तुष्टिर्भवत्येव न संशयः ॥ 55 ॥

मदनाकृतिरम्यत्वाद्दिव्यमङ्गलविग्रहः ।
सोऽयं मदनगोपाल इति नाम्नेरितस्त्वया ॥ 56 ॥

भविष्यति जगत्ख्यातं नामास्त्येतज्जगत्पतेः ।
जटायुक्षेत्रमेतद्धि त्वदाश्रमगतं मुने ।
पवित्रं परमं सर्वजगत्पूज्यं भविष्यति ॥ 57 ॥

इत्युदीर्य जगन्माता प्रहृष्टं वदनं हरेः ।
वीक्ष्यमाणाऽऽलुलोकेऽथ विष्वक्सेनं कृताञ्जलिम् ॥ 58 ॥

अथ सूत्रवतीनाथवेत्रकम्पनचोदिताः ।
प्रस्थानदुन्दुभीन् जघ्नुस्सन्नद्धा दिव्यसैनिकाः ॥ 59 ॥

परिपूर्णे हरिः श्रीमानगस्त्यमनोरथे ।
वीक्षमाणस्य तस्यैवमध्यारुक्षत् खगेश्वरम् ॥ 60 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दिव्यतूर्याण्यनाद्यन्त शतशोऽथ सहस्रशः ।
ननृतुश्चाप्सरस्सङ्घा जगुर्गन्धर्वचारणाः ॥ 61 ॥

पुष्पवृष्टिरभूद्दिव्या वैजयन्त्यश्चकम्पिरे ।
चामराण्यप्यवीज्यन्त स्वंधाम प्रस्थिते हरौ ॥ 62 ॥

क्षणादन्तर्हिते तस्मिन् देवे सर्वजगत्पतौ ।
विस्मितो मुनिशार्दूलः परमानन्दनिर्भरः ॥ 63 ॥

ऋतौ वसन्ते वैशाखे मासे तस्मिंस्तपोधनः ।
पौर्णमास्यां हरि लब्ध्वा निर्मलायां तटे शुभे ॥ 64 ॥

स्थिरे लग्ने शुभतमे सम्पन्नैस्सकलैर्गुणैः ।
दिव्यमङ्गलसंज्ञेऽथ विमाने देवनिर्मिते ॥ 65 ॥

तं प्रतिष्ठापयामास वेणुगोपालमच्युतम् ।
जगतां मूलकन्दं तं मुकुन्दं मुनिसत्तमः ॥ 66 ॥

प्रचुरकुसुमवृष्टिस्स्वर्गतो निर्गलन्ती
सुरभिलमखिलं तत्र माधत्त राजन् ।
दिवि घनतरवीणावेणुभेरीमृदङ्गध्वनिरभव-
दनन्ते सम्प्रतिष्ठापितेऽस्मिन् ॥ 67 ॥

इति भविष्योत्तरे श्रीविष्णुरहस्ये जटायुक्षेत्रमदनगोपालमाहात्म्ये नवमोऽध्यायः

****

॥ अथ दशमोऽध्यायः ॥

श्रीव्यास उवाच –

अथ तत्र प्रतिष्ठाप्य वेणुगोपालमच्युतम् ।
नद्यां सनिर्मलाख्यायां नित्यं स्नात्वा समाहितः ॥ 1 ॥

In Public domain. Digitization Muthulakshmi Research Academy

कृताह्निको महातेजा जपन् श्रीरामतारकम् ।
कमलोत्पलकल्हारैः पाटलैर्वकुलैरपि ॥ 2 ॥

करवीरैर्मल्लिकाभिः केतकीभिश्च चम्पकैः ।
कुन्दैरपि च मन्दारैस्तथा कुरवकोरकैः ॥ 3 ॥

मालतीकुसुमैश्चापि सुगन्धितुलसीदलैः ।
विधिवत्पूजयामास वेणुगोपालनन्दनम् ॥ 4 ॥

स एष भगवानद्य त्वया दृष्टो विशाम्पते ।
अगत्स्यस्य मुनेर्हेतोः परव्योम्न उपागतः ॥ 5 ॥

अमुमत्रस्थितं देवास्सिद्धगन्धर्वचारणाः ।
अद्याप्यनुदिनं राजन् समागत्य स्तुवन्ति हि ॥ 6 ॥

यथा श्रीरङ्गमाद्यं तद्यथा श्रीवेङ्कटाचलः ।
तथैवेदमपि क्षेत्रं पवित्रतममुच्यते ॥ 7 ॥

अत्र सप्तनदीसङ्गे स्नात्वा दृष्ट्वा च शङ्करम् ।
निर्मलायामपि स्नात्वा दृष्ट्वा कृष्णं जगत्पतिम् ॥ 8 ॥

सर्वपापानि धून्वन्ति प्राप्नुवन्त्यखिलं शुभम् ।
गोपालकृष्णः कृपया तान् रक्षति सदा नरान् ॥ 9 ॥

पुत्रार्थी प्राप्नुयात् पुत्रान् धनार्थी च तथा धनम् ।
शान्तिकामः परां शान्तिं बुद्धिकामः परां मतिम् ॥ 10 ॥

विद्याकामः परां विद्यां मोक्षकामः पराङ्गतिम् ।
अत्र यद्यत्कामयते नरस्तत्तज्जगत्पतेः ॥ 11 ॥

कृपया वेणुगोपस्य प्राप्नोत्येव न संशयः ॥ 12 ॥

एष नारायणः श्रीमान् श्रीवैकुण्ठनिकेतनः ।
इहावतीर्णो भूपालभक्तानुग्रहकाम्यया ॥ 13 ॥

In Public domain. Digitization Muthulakshmi Research Academy

गोभूहिरण्यरूप्यादि यद्यदत्र प्रदीयते ।
प्रीतयेऽस्य हरेस्तत्तदानन्त्यायैव कल्पते ॥ 14 ॥

इदं शरण्यन्महाख्यानं गोपालस्य रमापतेः ।
श्रावयन्नपि धर्मात्मा सर्वान् कामानवाप्नुयात् ॥ 15 ॥

इतीदं पाण्ड्यराजेन्द्र रहस्यं श्रेयसां पदम् ।
वेणुगोपालमाहात्म्यमाख्यातं भद्रमस्तु ते ॥ 16 ॥

किञ्चित्वामपि पृच्छामि कुत्रासि प्रस्थितोऽधुना ।
किं निमित्तं पुरस्कृत्य हित्वा राज्यश्रियं नृप ॥ 17 ॥

तदहं श्रोतुमिच्छामि किं निमित्तमिहागतः ।
ब्रूहि तत्त्वेन राजेन्द्र श्रोतुं कौतूहलं हि मे ॥ 18 ॥

काश्यप उवाच –

इति पाण्ड्यमहीपालः पाराशर्येण चोदितः ।
कृताञ्जलिपुटो वाग्मी विनीत इदमब्रवीत् ॥ 19 ॥

पाण्ड्य उवाच –

श्रुत्वा भागवतं दिव्यं भगवन् हृष्टमानसः ।
द्वारकादिष्वभिव्यक्तं कृष्णं द्रष्टुं समुत्सुकः ॥ 20 ॥

निक्षिप्य सचिवे राज्यं निर्गतो नगरान्निजात् ।
संसेव्य श्रीनिवासादीनिदं प्राप्तो वनं महत् ॥ 21 ॥

कृतस्नानोऽथ कृष्णायां जपन्मन्त्रं तदन्तरे ।
दिव्यदुन्दुभिनिर्घोषं श्रुत्वाऽऽगामत्र भक्तितः ॥ 22 ॥

महर्षे तमिमं देवमत्र वीक्ष्य रमापतिम् ।
कन्दर्पकोटिलावण्यं वेणुगोपालमच्युतम् ॥ 23 ॥

श्रुत्वा तद्वदनादस्य कथामपि सुधोपमाम् ।
अग्रतश्चलितुं किञ्चिदप्यहं नोत्सहेऽधुना ॥ 24 ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीकाश्यप उवाच –

इति तद्वचनं श्रुत्वा कृष्णद्वैपायनो मुनिः ।
तदब्रवीत्पुनः श्रीमान् वचनं वाग्विदां वरः ॥ 25 ॥

श्रीव्यास उवाच –

राजन् किं क्षेत्रसाहस्रैस्सेवितैश्शृणु मे वचः ।
तान्येतत्क्षेत्रमुख्यस्य कलां नार्हन्ति षोडशीम् ॥ 26 ॥

गोवर्धनद्वारकयोर्व्रजबृन्दावनादिषु ।
यो न सत्यनिशंसोऽयं भगवानत्र दृश्यते ॥ 27 ॥

तत्तत्क्षेत्रेषु वसतो दर्शनात्कमलापतेः ।
लभ्यते सुकृतं यावत्तावदस्यात्र दर्शनात् ॥ 28 ॥

नान्यद्गोपालबालस्य क्षेत्रमस्मादनुत्तमम् ।
विद्यतेऽभिमतं क्वापि बहुना विस्तरेण किम् ॥ 29 ॥

तदत्र परमोदारगभीरगुणसागरम् ।
ध्यायन् मदनगोपालं प्राप्नोषि परमां गतिम् ॥ 30 ॥

अनिश्चितमतिर्मर्त्यो गत्वापि क्षेत्रमुत्तमम् ।
तपस्तप्त्वापि परमं स लभेतैव तत्फलम् ॥ 31 ॥

तस्मात्त्वमपि राजेन्द्र निस्सन्देहमना इह ।
भजन् मदनगोपालं निश्श्रेयसमवाप्स्यसि ॥ 32 ॥

श्रीकाश्यप उवाच –

इति बोधितोऽथ मुनिवर्य गिरा सतुपाण्ड्यभूपतिरुदारमतिः ।
चकमे निरन्तरनिवासकृते किल तत्र कृष्णप्रदत्तमनाः ॥ 33 ॥

इति भविष्योत्तरे श्रीविष्णुरहस्ये मदनगोपालमाहात्म्ये दशमोऽध्यायः

****

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ एकादशोऽध्यायः ॥

श्रीकाश्यप उवाच –

अथ बद्धाञ्जली राजा तद्वाक्यमनुचिन्तयन् ।
(..) नः पप्रच्छ हृष्टात्मा विनयावनताननः ॥ 1 ॥

राजोवाच –

यत्त्वयाभिहितं क्षेत्रं सिंहवटाभिधम् ।
तत्र यो व्यक्तिमापन्नो नरसिंहो जगत्पतिः ॥ 2 ॥

तस्य लीलानरहरेस्तत्राविर्भावकारणम् ।
विस्तरेण कृपापूर्णो गदितुं त्वमिहार्हसि ॥ 3 ॥

श्रीकाश्यप उवाच –

इति तेनार्थितः श्रीमान् कृष्णद्वैपायनो मुनिः ।
श्रूयतामिति चामन्त्र्य स्निग्धं वचनमब्रवीत् ॥ 4 ॥

श्रीव्यास उवाच –

पुरा सिंहवटो नाम वटुः कश्चिद्विशाम्पते ।
श्रीमत्यहोबिलक्षेत्रे नरसिंहं रमासखम् ॥ 5 ॥

सेवितुं कृतसङ्कल्पो गङ्गाकूलाद्विनिर्गतः ।
दक्षिणाभिमुखं श्रीमान् प्रतस्थे भक्तिमेदुरः ॥ 6 ॥

अध्यर्धयोजनेह्यस्मात् क्षेत्रादुत्तरभागतः ।
आगत्य कञ्चिदद्राक्षीन्महारण्ये शिलोच्चयम् ॥ 7 ॥

तत्र मध्याह्नसमये स्नात्वा सरसि निर्मले ।
सस्मार नरसिंहस्य प्रादुर्भावकथां वटुः ॥ 8 ॥

अग्रतः कञ्चनस्थूलमुपलं वीक्ष्य सादरम् ।
द्रष्टुकामो हरेर्लीलां साक्षादिदमचिन्तयत् ॥ 9 ॥

सिंहवट उवाच –

यथा प्रह्लादहेतोः प्राक्सर्वात्मत्वं प्रकाशयन् ।
स्तम्भादाविरभूः श्रीमन्नरसिंहजगत्पते ॥ 10 ॥

तथाद्यात्र स्वकं रूपं प्रस्तरे मे प्रदर्शय ।
तदाश्चर्यदिदृक्षायां परं कौतूहलं हि मे ॥ 11 ॥

प्रादुर्भूतः प्रस्तरेऽस्मिन्नरसिंहाकृतिर्भवान् ।
भिन्दन्मन्मोहदैतेयं प्रह्लादमिव मामव ॥ 12 ॥

श्रीव्यास उवाच –

बद्धाञ्जलिपुटेनेत्थं प्रार्थितो वटुना हरिः ।
दिदर्शयिषुरेतस्य स्वशक्तिं परमाद्भुताम् ॥ 13 ॥

भिन्दंस्तं प्रस्तरं तत्र क्षणेन करुणानिधिः ।
प्रादुर्भूतस्तदात्युग्रध्वनिदारितदिङ्मुखः ॥ 14 ॥

अथ प्रफुल्लरोमाऽयं वटुस्सिंहवटाभिधः ।
शिलाया उदितं देवं नरसिंहं ददर्श सः ॥ 15 ॥

दंष्ट्रा करालवदनं सटाधूतमहाम्बुदम् ।
शङ्खचक्रगदापाणिं तनुमध्यं महाप्रभम् ॥ 16 ॥

उदीक्ष्य तं भयत्रस्तो बाष्पपर्याकुलेक्षणः ।
सम्प्रार्थयत तं देवं बद्धाञ्जलिपुटो वटुः ॥ 17 ॥

सिंहवट उवाच –

चापलात्प्रार्थितं देव मयाऽल्पमतिना हरे ।
शक्तिरस्ति नवेति त्वां शक्नुयात्कः परीक्षितुम् ॥ 18 ॥

धन्योऽस्म्यनुगृहीतोऽस्मि स्वंरूपमुपसंहर ।
कम्पते मे मनो दृष्ट्वा त्वां नृसिंहाकृतिं हरे ॥ 19 ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीव्यास उवाच –

इति तेनार्थितो देवो नरसिंहः कृपान्वितः ।
उवाच मधुरोदारं वचनं तं विशाम्पते ॥ 20 ॥

श्रीभगवानुवाच –

तात त्वत्प्रार्थनामेनां निमित्तीकृत्य साम्प्रतम् ।
जगतां रक्षणायेह प्रादुर्भूतोऽस्मि सुव्रत ॥ 21 ॥

पुनस्तव प्रार्थनया प्रविशामि शिलामिमाम् ।
एनामभ्यर्चयात्र त्वं मद्बुध्या मुनिबालक ॥ 22 ॥

अग्रतो नैव गन्तव्यं भवताऽहोबिलं प्रति ।
यस्तत्रास्मि स एवात्र प्रादुर्भूतोऽस्मि साम्प्रतम् ॥ 23 ॥

जहीहि मोहमुद्भूतं मया विश्वमिदं ततम् ।
अत्रैव मां पूजय त्वं सर्वाभीष्टं ददामि ते ॥ 24 ॥

ख्यातिं गमिष्यति क्षेत्रमिदं सिंहवटाख्यया ।
अत्र मां भजतां नृणां ददामि निखिलेप्सितम् ॥ 25 ॥

श्रीव्यास उवाच –

इत्युदीर्य नृसिंहोऽसौ प्रविष्टस्तां शिलां तदा ।
बद्धसन्धिस्स्सा शिलापि चक्रमय्यभवन्नृप ॥ 26 ॥

चक्रोज्वलाङ्गीं तामेतां नरसिंहमयीं शिलाम् ।
पूजयन्त्यधुना सर्वे ससुरासुरमानवाः ॥ 27 ॥

तत्राभीष्टं फलत्याशु ग्रहपीडा प्रणश्यति ।
तापास्त्रयोऽपि शाम्यन्ति नरसिंहस्य दर्शनात् ॥ 28 ॥

तत्राल्पमपि यद्दत्तं प्रीत्यै तन्नृहरेर्भवेत् ।
फलत्यनन्तं तन्नृणां नात्र कार्या विचारणा ॥ 29 ॥

इमं सिंहवटक्षेत्रे नरसिंहोद्भवं नरः ।
श्रुत्वा च श्रावयित्वा च सद्यो बन्धात्प्रमुच्यते ॥ 30 ॥

इतीदं सर्वमाख्यानं नरसिंहस्य भूपते ।
विख्यातं पृच्छते तुभ्यं रहस्यं श्रेयसां पदम् ॥ 31 ॥

हरेर्मदनगोपस्य पूजामाध्याह्निकी नृप ।
प्रवर्ततेऽद्य तत्सेवां करिष्यामो यथोचितम् ॥ 32 ॥

उत्तिष्ठ नरशार्दूल कुरु माध्यन्दिनीं क्रियाम् ।
अन्यन्मदनगोपालसेवाया विद्यतेऽधिकम् ॥ 33 ॥

इति मुनिगदितं निशम्य वृत्तं धरणिपतिस्स तु गोपवेषविष्णोः ।
कनकमणिसुमैर्महाभिषेकं व्यतनुत तस्य पराशरात्मजस्य ॥ 34 ।

स तस्य पादाववनिज्य भूपतिर्मुदा शिरस्तत्र निवेश्य भक्तितः ।
ग्रामाननेकान् प्रददौ मुनींश्च तानतोषयद्भूरिसुवर्णदानतः ॥ 35 ॥

अभिपूज्य मुनिं मुदा स यावत्तदनुज्ञां प्रतिपद्य(....अनन्य?)चेताः ।
अभिलष्यति देवसेवनाय प्रचुरं तावदभू(..दुच्च?) तूर्यनादः ॥36॥

निशम्य गम्भीरमुदारमद्भुतं मृदङ्गवीणापणवादिनिस्वनम् ।
प्रकीर्यमाणः कुसुमोत्करैस्सुरैर्महीपतिस्सोऽप्युदतिष्ठदासनात् ॥37॥

प्रणम्य नन्दव्रजगोपकन्यकामनोज्ञकौमारहरं परात्परम् ।
निषेव्य माध्याह्निकपूजने च तं स धन्यतामाप्तुमियेष भूपतिः ॥38॥

इति भविष्योत्तरे श्रीविष्णुरहस्ये जटायुक्षेत्रमदनगोपालमहात्म्ये
एकादशोऽध्यायः

****

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ द्वादशोऽध्यायः ॥

अथ सर्वेऽपि मुनयस्तत्कथाश्रवणाद्द्विजाः ।
प्रहुष्टमनसः पाण्ड्यं राजानमिदमब्रुवन् ॥ 1 ॥

मुनय ऊचुः –

राजंस्त्वयि समायाते महाभागवतोत्तमे ।
श्रुताऽस्माभिः कथा सेयं सत्सङ्गश्श्रेयसां पदम् ॥ 2 ॥

काश्यप उवाच –

इति तैस्संस्तुतो राजा कृत्वा माध्याह्निकीं क्रियां(..) ।
साकं तैर्वेणुगोपालं जायापुत्रसमन्वितः ॥ 3 ॥

संसेव्य धन्यमात्मानं मन्यमानो महामनाः ।
आपृच्छ्य तेषु यातेषु व्यासादिषु यथायथम् ॥ 4 ॥

आहूयाथ स्विकां सेनां वेणुगोपालसन्निधौ ।
पुत्रं निजं महोदारं शान्तं नाम महामतिम् ॥ 5 ॥

अभिषिच्य प्रहर्षेण तीर्थैर्देवपदोद्भतैः ।
राज्यगुप्त्यै समाज्ञाप्य तया पृतनया सह ॥ 6 ॥

शुभ्रे प्रस्थापयामास लग्ने तं स्वपुरं प्रति ।
जायया सहितस्सोऽथ क्षेत्रे तत्रावसन्नृपः ॥ 7 ॥

पुत्रस्तु राज्यं स्वं प्राप्य गोपालं चिन्तयन् हरिम् ।
(..जुगो?)प पृथिवीं श्रीमान् शान्तो दान्तो द्विजोत्तमाः ॥ 8 ॥

एष पाण्ड्योऽपि गोपालमर्चयन् जायया सह ।
उवास सुसुखं तत्र तत्कथां चिन्तयन् सदा ॥ 9 ॥

उत्सवान् कारयामास पञ्चरात्रविधानतः ।
तत्तत्कालेषु तं देवमुपतस्थे यथाविधि ॥ 10 ॥

तत्प्रीत्यै वितताँरैष रत्नहेमपरिच्छदान् ।
(..वश्या) नश्वान् महानागान् भुवङ्गाश्च यथेप्सितम् ॥ 11 ॥

(..देवं?)तं वेणुगोपालमर्चयन् पाण्ड्यभूपतिः ।
(..तस्मिन्?) जटायुषः क्षेत्रे प्रमोदमभजद्द्विजाः ॥ 12 ॥

तदेतत्परमं क्षेत्रं मङ्गलानां च मङ्गलम् ।
(..अद्या)पि सेव्यते सर्वैर्मनुजैस्स सुरासुरैः ॥ 13 ॥

तत्र देशे शान्तिधना ज्ञानिनो ब्राह्मणोत्तमाः ।
(..)जानश्च महोदारास्सत्कुलीनादृढव्रताः ॥ 14 ॥

सदा मदनगोपालपादाब्जन्यस्तमानसाः ।
वैश्याश्शूद्राश्च धर्मिष्ठा भविष्यन्ति न संशयः ॥ 15 ॥

कथितमिति महत्पवित्रमार्षं चरितमिदं किल गोपवेषविष्णोः ।
य इह निशमयत्युदारचेता हरिरपि तस्य तनोति नित्यलक्ष्मीम्॥16॥

कच्चिद्भवद्भिः प्रयतात्मचित्तैः श्रुतं मयोदी(रीतम..)द्य विप्राः।
किमिच्छथ श्रोतुमिहान्यदारात्तद्वोऽ(.....)योगिवरा ब्रवीमि॥ 17॥

नव्यभव्यगुणोपेतं दुर्गमं दैवतैरपि।
कृष्णमाश्रितसन्त्राणकृतं सञ्चिन्तये हरिम्॥

इति भविष्योत्तरे श्रीविष्णुरहस्ये जटायुक्षेत्रमदनगोपालमाहात्म्ये
द्वादशोऽध्यायः।

॥श्लोकाः 537॥

॥समाप्तश्च प्रबन्धः॥अस्मद्गुरुभ्यो नमः॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

अक्षरक्रमगतश्लोकसूची

प्रथमोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अभिवीक्ष्य महाबाहुं पुण्डरीकायतेक्षणम्।	14
2)	अहो गिरे रम्यतास्येत्यति विस्मितमानसः ।	43
3)	इति पृष्टस्स तैर्धीमानादरोत्फुल्ललोचनैः ।	12
4)	इति सम्प्राप्य हृष्टात्मा पुनर्नत्वा श्रियःपतिम् ।	34
5)	उत्तरां दिशमुद्दिश्य जगामपुरुषर्षभः ।	36
6)	उषित्वा कतिचित्तत्र दिनानि स महीपतिः ।	15
7)	कावेरीयुगलीदोर्भ्यां धरणोत्सुकचेतसा ।	12
8)	कोटिसूर्यप्रतीकाशरत्नकोटीरभूषितम् ।	26
9)	क्षेत्राण्यष्टादशाप्येष तत्र वीक्ष्य महामनाः ।	17
10)	गरुडाचलवेदाद्रि प्रान्तैकान्ततरद्रुमे ।	45
11)	गोलाङ्गूलैर्महाकायैर्वानरैः पर्वतोपमैः ।	39
12)	घोररूपैर्महाव्याघ्रैश्चमरैस्सृमरैरपि ।	38
13)	चक्रतीर्थे च राजेन्द्रस्सर्वपापविनाशने ।	53
14)	चक्षुषोर्गोचरं कुर्वन् सम्प्रहृष्टतनूरुहः ।	32
15)	तत्पदन्यासपूतानि जगतां पावनानि च ।	6
16)	तत्र तत्र जगन्नाथमर्चारूपेण भासुरम् ।	16
17)	तत्रतत्र कृतावासमर्चारूपेण माधवम् ।	7
18)	तदनुज्ञां ततो लब्ध्वा परिपूर्णमनोरथः ।	35
19)	तदन्तरे शयानं तं शेषतल्पे श्रियःपतिम् ।	13
20)	तद्धि सप्तनदीसङ्गस्थानमित्यभिधीयते ।	51
21)	तनुमध्यं निम्ननाभिं दीर्घबाहुस्थलं हरिम् ।	29
22)	तुङ्गया भद्रया वेण्या भीमरथ्या द्विजोत्तमाः ।	50
23)	तेनागस्त्येन मुनिना प्रतिष्ठापितमुज्वलम् ।	54
24)	दूरादनुगतः पौरैस्ताननुज्ञाप्य सादरम् ।	10
25)	ध्यायं ध्यायं महात्मानं परमात्मानमव्ययम् ।	15
26)	नृसिंहगिरिमारुह्य नरसिंहं ददर्श सः ।	19
27)	पञ्चषैर्दिवसैश्श्रीमानवाप गिरिसन्निधिम् ।	21
28)	पश्चिमां दिशमाकाङ्क्षन्त्यगाद्योजनत्रयम् ।	48

In Public domain. Digitization Muthulakshmi Research Academy

29)	पुण्डरीकविशालाक्षं सुनसं सुस्मिताधरम् ।	27
30)	पुत्रं दारान् पुरस्कृत्य दैवज्ञांश्च पुरोहितान् ।	9
31)	बहुदूरमतिक्रम्य तत्र श्रीशैलभूधरे ।	47
32)	ब्रह्महत्यासहस्राणि किं पुनर्नियमाप्लवात् ।	52
33)	भगवन् सर्वदाप्यस्मानभिरक्ष दयानिधे ।	33
34)	भृङ्गराजमिव श्रीमान्मानसाम्भोरुहान्तरे ।	24
35)	महानीलमणिच्छायां तां ददर्श स पाण्ड्यराट् ।	49
36)	महाभागवतस्सोऽयं महाभागवतामृतम् ।	4
37)	योजनानि बहून्येष व्यतीयाय परन्तपः ।	44
38)	रुचिरकुसुमतारकाभिराम... ।	55
39)	विन्ध्यायमानैरन्यैश्च महामेघायितैरपि ।	41
40)	शङ्खचक्रधरं देवं हिरण्यकशिपुद्विषम् ।	46
41)	श्रीमद्भागवतं पाण्ड्यश्श्रुत्वा भक्त्या स भूपतिः ।	1
42)	श्रीवत्सकौस्तुभाभ्यां च लोलया वनमालया	28
43)	श्रुतिमौलिमहानीलमिन्दीवरसमच्छविम् ।	25
44)	श्रूयतां मुनिभिस्सर्वैराख्यानं भद्रमस्तु वः ।	3
45)	सत्त्वैरनेकैराकीर्णं महागम्भीरदर्शनम् । 40	40
46)	साक्षाच्छेषावतारं तं श्रीमन्तं वेङ्कटाचलम् ।	22
47)	सालतालतमालाद्यैस्सान्द्रपर्णैर्महीरुहैः ।	42
48)	सुनीति नाम्नि सचिवे न्यस्तराज्यभरो नृपः ।	8
49)	स्नात्वा कल्याणसरसि दृष्ट्वा देवं जगत्पतिम् ।	18
50)	स्नात्वा कवेरजातीर्थे प्रथमं राजसत्तमः ।	11
51)	स्फुरत्कटककेयूरकाञ्चीहंसकभूषणम् ।	30
52)	स्मारं स्मारं नृसिंहं तं दिव्यमङ्गलविग्रहम् ।	20
53)	स्रवद्रक्तैरिवाहार्यैर्गैरिकस्यन्दपाटलैः ।	37
54)	स्वतपोहतपाप्मानं श्रीनिवासं जगद्गुरुम् ।	31
55)	स्वामिपुष्करिणीतीर्थे स्नात्वोत्तीर्य ततो नृपः	23

द्वितीयोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अचिन्तयन्निमित्तैस्तैरपूर्वैश्शुभपोषकैः ।	5
2)	अथ तस्य विमानस्य समीपमुपसृत्य सः ।	19

In Public domain. Digitization Muthulakshmi Research Academy

3) अथवा भगवत्पादपङ्कजैकान्तचेतसाम् । 7
4) अथवा महतामेष स्वभावो दुरवग्रहः । 29
5) अदवीयसि देशेऽथ दिव्यचम्पककुड्मलैः । 15
6) अविदूरान्निनादं तं श्रुत्वा तां दिशमैक्षत । 11
7) अविरतनिजपार्श्वयुग्मखेलज्जलधिसुताधरणीविहारलोलम् । 39
8) आपादमौलितमिमं प्रविलोक्य देवमुत्तुङ्गसम्मदमहीधरशृङ्गवर्ती । 41
9) इति चिन्तयतोऽमुष्य दिव्यदुन्दुभिनिस्वनः । 9
10) इति तैस्संस्तुतश्श्रीमान् पाण्ड्यराजो महायशाः । 26
11) इति बद्धाञ्जलिश्श्रीमांस्तान्विज्ञाप्य तदाज्ञया । 30
12) इतोऽपि नान्यद्विद्येत निमित्तानां महाफलम् । 8
13) इत्याज्ञाप्य महाबाहुस्सैनिकान् सञ्चरन् पदा । 14
14) ईदृशानि निमित्तानि नैव वन्ध्यानि जातुचित् । 6
15) कपिलं च महात्मानं जैमिनिं च्यवनं तथा । 21
16) कमलदलविशालनेत्रमुद्यद्दिनकरभासुरनूलरत्नमौलिम् । 31
17) करकमलयुगात्तवेणुनादस्वरविवशीकृतगोपिकान्तरङ्गम् । 34
18) करिकरनिभपीवरोरुकाण्डं तनुतरमध्यतलं गभीरनाभिम् । 38
19) कुसुमशरधनुर्विभासितभ्रूयुगलमुदारगभीरकम्बुकण्ठम् । 33
20) क्व भवन्तो महान्तोऽमी क्वाहं नीचात्मनां वरः । 28
21) चिराच्छ्रुतोऽसि दिष्ट्या त्वमद्य प्रत्यक्षतां गतः । 24
22) जपतोऽस्य महाबाहोः कृष्णैकायत्तचेतसः । 3
23) जलधररुचिरजैत्रविग्रहाभं त्रिवलिविशोभितनूदराभिरामम् । 37
24) तपश्चर्यासुनिष्ठेभ्यो भवद्भ्योऽस्तु नतिर्मम । 27
25) तमिममनघसद्गुणौघसिन्धुं कुसुमशरासनकोटिसुन्दराङ्गम् । 40
26) तावदत्रैव युष्माभिस्स्थेयं यावदहं पुनः । 13
27) ते तमुद्वीक्ष्य कुशलमपृच्छन्मुनिसत्तमाः । 23
28) दर्शनादेव तस्याथ विमानस्यामितौजसः । 17
29) देवसन्दर्शनाकाङ्क्षिमुनिबृन्दनिरन्तरम् । 16
30) न खल्वल्पेन तपसा त्वादृशां कृष्णचेतसाम् । 25
31) नवनवरुचिपद्मरागराजीखचितमनोहरकुण्डलात्तगण्डम् । 32
32) नृत्यत्स्वर्गणिकाहैममञ्जीरध्वनिमञ्जुलः । 10
33) पुत्रेण जायया चापि विस्मितः प्रणनाम तत् । 18
34) प्रविश्य तद्वनं रम्यं राजा राजीवलोचनः । 1
35) प्रसृमरघनसौरभानुकृष्णभ्रमरलसद्वनमालिकामनोज्ञम् । 35

In Public domain. Digitization Muthulakshmi Research Academy

36) प्रायशो भगवत्क्षेत्रमेतत्स्यान्नात्र संशयः । 12
37) प्रास्फुरद्दक्षिणो बाहुर्नयनं चापि दक्षिणम् । 4
38) मणिमयकटकाङ्गदादिभूषासमुदयभूषितदीर्घबाहुम् । 36
39) महोदारान्महाशान्तान्यतचित्तान् दृढव्रतान् । 22
40) व्याघ्रपादञ्च कण्वं च ऋश्यश्रृङ्गं च रोमशम् । 20
41) समुल्लसद्बाष्पगभीरगद्गदस्वरस्तुवन् गोपवधूमनोहरम् । 42
42) स्नात्वा सन्ध्यामुपास्याथ देवर्षिपितृतर्पणम् । 2

तृतीयोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अपसृत्य पदन्यासैर्मन्दं मन्दमुदारधीः ।	2
2)	अयोध्या नाम नगरी कोसलेषु बभूव ह ।	14
3)	अहो ते श्रेयसी बुद्धी राजर्षे पाण्ड्यसत्तम ।	12
4)	इति तैः प्रार्थितश्श्रीमान् कृष्णद्वैपायनो मुनिः ।	11
5)	इति पाण्ड्यावनीशेन तेन पृष्टा महर्षयः ।	8
6)	इत्युक्त्वार्घ्यं तथा पाद्यं कन्दमूलफलानि च ।	41
7)	ऊर्मिलालक्ष्मणस्यासीद्भार्या गुणगणोज्वला ।	21
8)	एष भक्तो हरेस्साक्षात्पाण्ड्यः पृच्छति भक्तितः ।	10
9)	कथञ्चन चिराद्देवाद्दृष्टिमाकृष्य भूपतिः ।	1
10)	करवीरैर्बीजपूरैर्वञ्जुलैर्हिञ्जुलैरपि ।	26
11)	कानिचिद्दिवसान्येष तत्रोषित्वा रघूद्वहः ।	42
12)	किन्निमित्तमिह श्रीमानरविन्दविलोचनः ।	6
13)	कैकेयीगर्भसम्भूतो भरतोऽभिरतोऽग्रजे ।	18
14)	कैकेयीवचसे तस्मै श्रेयांस्यभ्यर्थयामहे ।	34
15)	कौसल्यायां समुत्पन्नस्तत्र रामो महाभुजः ।	16
16)	जम्भीरैश्च कदम्बैश्च कुटजैः पाटलैरपि ।	27
17)	तं विलोक्य महाभागमगस्त्यो मुनिसत्तमः ।	31
18)	ततः पुरस्ताच्चलितुं स कौतुको महानुभावो रघुवंशवर्धनः ।	44
19)	तत्रागस्त्यं महातेजा ववन्दे सह लक्ष्मणः ।	30
20)	तमेव हृदये ध्यायन् सम्प्रहृष्टतनूरुहः ।	3
21)	ते विष्णोरंशसम्भूतास्तनयोऽप्यमिततेजसः ।	19
22)	त्वं हि सर्वकथाभिज्ञो निर्मितं भारतं त्वया ।	9

In Public domain. Digitization Muthulakshmi Research Academy

23)	दिष्ट्या प्राप्तोऽसि भद्रं ते मदाश्रमपदं विभो ।	35
24)	धन्यो युष्मन्मुखाम्बोजमकरन्दझरीं कथाम् ।	7
25)	धन्योऽस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ।	40
26)	धर्मपत्न्योऽस्य कौसल्या कैकेयी चेति भूपतेः ।	15
27)	धूतवैरैर्महासत्त्वैर्विहरद्भिर्मनोहरम् ।	29
28)	न केवलमहं धन्यस्त्वन्मुखाम्भोजदर्शनात् ।	36
29)	नरवेषप्रतिच्छन्नो भवान्नारायणो हरिः ।	33
30)	निर्वृत्तं रघुशार्दूल तपसा नः प्रयोजनम् ।	37
31)	पारिभद्रैस्तथोन्निद्रैर्मल्लिकावल्लिकाञ्चितैः ।	28
32)	भगवानेष गोपालस्तपसा कस्य तोषितः ।	5
33)	भो मुनीन्द्रा महात्मानो भवन्तो भूरितेजसः ।	4
34)	मिथिलाधिपतेः पुत्री जनकमहात्मनः ।	20
35)	लक्ष्मणेन सह भ्राता सीतया चापि भार्यया ।	23
36)	शरभङ्गं प्रणम्याथ सुतीक्ष्णं च महामुनिम् ।	24
37)	शुभौ चाक्षयतूणीरौ वधार्थं सर्वरक्षसाम् ।	43
38)	श्रूयतामभिधास्यामि महर्षिणां च श्रुण्वताम् ।	13
39)	स एष लक्ष्मणश्श्रीमाननुजस्त्वामनुव्रतः ।	39
40)	स सत्यवचनाद्भीतः पितुराज्ञामनुव्रतः ।	22
41)	साक्षाल्लक्ष्मीपतिस्सोऽयं भगवान्भूतभावनः ।	17
42)	साक्षाल्लक्ष्मीरियं सीता वनेऽपि त्वामनुव्रता ।	38
43)	सुतीक्ष्णस्याश्रमपदात्प्रस्थाय पुरुषर्षभः ।	25
44)	स्वागतं ते जगन्नाथ भगवन् भूतभावन ।	32

चतुर्थोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अगस्त्यक्षेत्रमाख्यातं परितो योजनत्रयम् ।	13
2)	अज्ञातिवर्तनादस्मान्माभूत्ते मनसोऽप्रियम् ।	29
3)	अतोऽग्रतो वने घोरे जगत्प्रियचिकीर्षया ।	5
4)	अथवा भुवनत्राणकृतदीक्षोऽसि राघव ।	3
5)	अध्यर्धयोजने तस्माद्दक्षिणस्यां दिशि प्रभो ।	8
6)	अनवाप्तमवाप्तव्यं किं मया ते तपोधन ।	31
7)	अनेनैवात्मना तत्र वसेयं यदि सत्तम ।	24

In Public domain. Digitization Muthulakshmi Research Academy

8)	अनेनैवात्मना तत्र वासो मह्यं न रोचते ।	39
9)	अस्मिन्नेवं गते कार्ये जना मां भ्रातृघातिनम् ।	27
10)	इति तद्वचनं श्रुत्वा सस्मितो रघुनन्दनः ।	37
11)	इति सम्प्रार्थितस्तेन तदनुज्ञामवाप्य सः ।	48
12)	इति सम्प्रार्थितस्तेन रामो राजीवलोचनः ।	22
13)	इतो दक्षिणतो दूरे श्रीमत्सिंहवटाभिधम् ।	7
14)	इत्युक्तस्तेन स मुनिरुवाच रचिताञ्जलिः ।	46
15)	इत्युक्तो दाशरथिना स्मयमानमुखाम्बुजः ।	32
16)	उद्देशे त्रिजगत्ख्याते वने गम्भीरदर्शने ।	9
17)	एतस्मादाश्रमपदात्तदतीव प्रियं मम ।	10
18)	एवमप्युच्यमानं मे वचनं श्रोतुमर्हसि ।	38
19)	कंसाद्भीतेन तत्रापि वसुदेवेन सुव्रत ।	41
20)	किमन्यैर्बहुभिर्वाक्यैस्तत्र वासाय राघव ।	36
21)	कृष्णा वेणी तथा तुङ्गा भद्रा क्षीरनदी तथा ।	11
22)	क्षेत्रं जटायुषो भाति कृष्णाया उत्तरे तटे ।	14
23)	गाः पालयन् श्रयिष्यामि गोपालाख्यामहं तदा ।	42
24)	चिरात्प्रार्थयमानानां त्वन्नो दृष्टिपथं गतः ।	2
25)	जगतां मोहनायैव मनुजत्वं तव प्रभो ।	34
26)	तत्र त्वां कृतसान्निध्यं नित्यमिच्छामि सेवितुम् ।	17
27)	तत्र देवास्सगन्धर्वाश्चारणाश्च महर्षयः ।	15
28)	तदा प्रार्थयमानं तं प्रस्थानाय नरर्षभम् ।	1
29)	तदात्वधिज्यं रचयन् शरासनं महानुभावो रघुवंशवर्धनः ।	49
30)	तदिदानीं निवृत्ते तु वनवासे महामुने ।	28
31)	तद्धि सप्तनदीसङ्गक्षेत्रमित्यभिधीयते ।	12
32)	तव प्रसादं काङ्क्षन्ति चिरात्तपसि शिक्षिताः ।	35
33)	तावत्तत्र प्रतीक्षस्व नियमात्तपसि स्थितः ।	44
34)	तावदद्यानुजानीहि मां प्रस्थानाय सुव्रत ।	45
35)	तेन गोपालरूपेण तत्राश्रमपदे स्थितः ।	43
36)	त्वत्पादपरिचर्यायै प्रायः कृष्णापि निम्नगा ।	19
37)	द्वापरान्ते भविष्यामि यदूनामन्वये मुने ।	40
38)	निहत्य सङ्ख्ये देवानां मुनीनां च प्रियं कुरु ।	4
39)	परन्त्वभ्यर्थना काचिदस्ति मे श्रूयतां विभो ।	6
40)	प्रतारयसि कस्मान्मामेवं वाग्भिः कृपानिधे ।	33

In Public domain. Digitization Muthulakshmi Research Academy

41)	प्रायो भवत्पितुस्सख्युर्जटायोरप्यति प्रियम् ।	20
42)	यथा त्वं परमे व्योम्नि वसस्यमितवैभवः ।	18
43)	यथेदं भारतं वर्षं वर्षाणामुत्तमोत्तमम् ।	16
44)	यथेष्टं क्रियतां राम कृपास्तु परमा मयि ।	47
45)	यदात्थ भगवन् प्रीत्या तत्तथैव परन्त्विह ।	23
46)	राजधानीमयोध्यां तामप्राप्ते च पुनर्मयि ।	25
47)	वनवासे समाप्ते तु मामदृष्ट्वा महामनाः ।	26
48)	सर्वेषां नः प्रियाय त्वं वस तत्र दयानिधे ।	21
49)	स्वतः प्रज्ञाततत्वस्य किमु मद्दर्शनेन ते ।	30

पञ्चमोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अतिक्रान्तमतिक्रान्तमित्यावेगाकुलेक्षणः ।	35
2)	अत्रान्तरे मृगं हत्वा मारीचं वीक्ष्य तं हतम् ।	33
3)	अथ तत्कर्मणा तस्य राघवोऽति कृपान्वितः ।	39
4)	अथ बाष्पपरीताक्षश्शरण्यो रघुनन्दनः ।	47
5)	अथ योद्धुमनीशानं तं विलोक्य जटायुषम् ।	32
6)	अथाग्रतो वने सीतां विचिन्वन् सह लक्ष्मणः ।	49
7)	अन्यथा त्वां हनिष्यामीत्युक्तस्तेन दुरात्मना ।	17
8)	अमृष्यमाणस्तत्कर्म क्रूरकर्मा दशाननः ।	31
9)	अयोध्यां प्राविशच्छ्रीमान् पूर्णे वर्षे चतुर्दशे ।	53
10)	इतोऽपि चेद्वरं कञ्चित् प्रदातुं दयसे विभो ।	42
11)	इत्थं जटायुना रुद्धो रावणो लोकरावणः ।	27
12)	उटजादभिनिष्क्रान्तो राममार्गमनुव्रतः ।	22
13)	एतन्मे दुष्करमिति प्रत्याख्यातोऽपि रावणः ।	16
14)	कदाचित्तत्र सम्प्राप्तां राक्षसीं लोकनाशनीम् ।	8
15)	का शक्तिरपहर्तुं ते मयि तिष्ठति जानकीम् ।	26
16)	किमेतत् क्व नु सीतेति पप्रच्छ विहगाधिपम् ।	38
17)	कृत्वौर्ध्वदैहिकं तस्य तस्मै लोकांस्तथाक्षयान् ।	48
18)	गृध्रं जटायुषं तत्र वेष्टमानं वनान्तरे ।	37
19)	चरन्सीताप्रमुखतस्तस्याश्चित्तं जहार सः ।	18
20)	छिन्नच्छत्रं भग्नरथं छिन्नकेयूरचामरम् ।	28

In Public domain. Digitization Muthulakshmi Research Academy

21)	जटायुरब्रवीत्तेन राघवेण प्रचोदितः ।	40
22)	जहार रामरामेति क्रोशन्तीं कुररीमिव ।	23
23)	तं रामपत्न्याहरणं कार्यमित्यभ्ययाचत ।	15
24)	तं वीक्ष्य राघवं श्रीमान् जटायुर्वाक्यमब्रवीत् ।	5
25)	ततः पञ्चवटीं गच्छन्नन्तरा रघुनन्दनः ।	1
26)	ततश्शूर्पणखावाक्यात्तन्निशम्य दशाननः ।	13
27)	ततस्तद्वचसा नुन्ना राक्षसा घोरदर्शनाः ।	11
28)	ततस्सुदूरे गच्छन्तं मृगं बाणेन जघ्निवान् ।	20
29)	ततोऽपहृत्य रामस्य प्रियां जनकनन्दिनीम् ।	24
30)	ततोऽभिषिक्तस्समये शुभे द्विजैर्वसिष्ठमुख्यैरखिलैश्च नागरैः ।	54
31)	तन्निशम्याति वित्रस्तां जानकीमपि सान्त्वयन् ।	21
32)	तन्ममाभीप्सितं राम पूरणीयं त्वया विभो ।	44
33)	तावत्तत्कर्म विबुधाः प्रशशंसुस्सचारणाः ।	30
34)	दर्शनादेव तस्याथ जटायुर्हृष्टमानसः ।	2
35)	दिवि वा भुवि वा श्रीमंस्त्वत्पदाब्जे मतिर्मम ।	41
36)	दुरात्मन्नपहृत्यैनां भार्यां रामस्य धीमतः ।	25
37)	न कुतश्चिद्भयं तात मया गुप्तस्य ते भवेत् ।	7
38)	निवर्तमानस्सौमित्रिं मध्ये मार्गं विलोक्य च ।	34
39)	निशाचराणां राजानं कृत्वा तं च विभीषणम् ।	52
40)	निहत्य रावणं सङ्ख्ये कुम्भकर्णादिकानपि ।	51
41)	पर्णशालां समासाद्य तत्रादृष्ट्वा प्रियां निजाम् ।	36
42)	पितुर्वाक्याद्वनं प्राप्तं वेद्मि त्वां सत्यविक्रमम् ।	6
43)	पितुस्सखेत्यगस्त्यस्य वचनाद्राघवो विदन् ।	4
44)	पृच्छतः किं किमित्येव रामस्य विदितात्मनः ।	46
45)	प्राणप्रियाहरणान्नान्यत् क्लेशस्य कारणम् ।	14
46)	प्रार्थितो लक्ष्मणं तस्या रक्षणाय नियुज्य सः ।	19
47)	मदाश्रमे सदावासं यथेच्छसि तथा कुरु ।	43
48)	मनुकुलतिलको महानुभावश्चिरतरमेष शशास हृष्टचित्तः ।	55
49)	राक्षसानां खरादीनां सहस्राणि चतुर्दश ।	12
50)	रामश्शूर्पणखां नाम चेष्टमानां यथेप्सितम् ।	9
51)	रामोऽपि प्रेमगर्भं तद्वचः श्रुत्वा द्रवन्मनाः ।	3
52)	लक्ष्मणोऽपि तदाज्ञप्तः खड्गमुद्धृत्य रुष्टधीः ।	10
53)	विधाय गृध्रराजोऽयं क्षणेनैव महामनाः ।	29

In Public domain. Digitization Muthulakshmi Research Academy

54)	सीतां प्राप्य पुनः श्रीमन् राज्यं प्राप्नुहि सुव्रत ।	45
55)	हनूमद्वचनाद्रामो वसन्तीं रावणालये ।	50

षष्ठोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अत्रान्तरे दाशरथेर्वरदानमनुस्मरन् ।	12
2)	अथ जातु द्वापरान्ते यदूनामन्वये हरिः ।	2
3)	अथ नन्दव्रजे तत्र निवसन् यदुनन्दनः ।	5
4)	अथवा भगवान् साक्षात् करुणामृतसागरः ।	26
5)	अद्य श्वो वा समेयात्स भगवानिति सन्तता ।	29
6)	अभिषिच्योग्रसेनं च मधुरायां महामनाः ।	8
7)	अहो दुर्भागधेयोऽहं सर्वथैव न संशयः ।	19
8)	इदं मदाश्रमपदं नालञ्चक्रे जगत्पतिः ।	20
9)	एतस्मिन्नन्तरे देवं वासुदेवं जगद्गुरुम् ।	16
10)	एवं स भगवानेव मिथ्यावादी भवेद्यदि ।	24
11)	किं करोमि क्व गच्छामि कं नु वाद्य प्रसादये ।	22
12)	किं कुर्याद्भगवानस्मत्कर्मणे करुणानिधिः ।	28
13)	क्व तादृशं भागधेयं मम क्षुद्रमतेर्भवेत् ।	32
14)	क्वाहं क्षुद्रमतिः कुत्र भगवान् स जगत्पतिः ।	31
15)	जातमात्रं शिशुं दृष्ट्वा वसुदेवो महामनाः ।	3
16)	तमुपागतं मुनिमुदात्तवर्चसं धुरि नारदं समभिवन्द्य भक्तितः ।	40
17)	दशवर्षसहस्राणि दशवर्ष शतानि च ।	1
18)	दिशो मे सम्प्रणश्यन्ति तं विचिन्तयतो मम ।	38
19)	धिङ्गां मन्दधियं योऽहं रामो द्विर्नाभिभाषते ।	25
20)	धीमान् यद्यभविष्यं प्राक् प्रार्थयिष्येत दैवतम् ।	33
21)	निजाश्रमपदे देवं ध्यायं ध्यायं महातपाः ।	13
22)	निधिं दैववशाल्लब्धं हित्वान्धतमसस्थितः ।	35
23)	पश्चादवतरिष्यामीत्याह यत्तत्प्रतारणम् ।	37
24)	पालयत्येव मां देवश्शरणागतवत्सलः ।	23
25)	पूतनाशकटारिष्टतृणावर्तबकादिमान् ।	4
26)	प्रत्याख्यातुं च नाशक्ष्यच्छरणागतवत्सलः ।	34
27)	प्रायः कृपानिधेश्चापि मां दृष्ट्वा करुणाहरेः ।	21

In Public domain. Digitization Muthulakshmi Research Academy

28)	भगवद्दिव्यकरुणाचन्द्रिकैषा निरर्गलम् ।	27
29)	भूमेर्भारायमाणांस्तान् धार्तराष्ट्रान् सपाण्डवः ।	11
30)	मनोरमाभिर्लीलाभिर्गोपीनां प्रीतिमावहन् ।	6
31)	मन्ये प्रादुर्भवेद्दत्तं वरदानमनुस्मरन् ।	15
32)	मन्ये रघुपतेस्तस्य कृपा मयि न वास्तवी ।	36
33)	राजकन्यास्सहस्राणि षोडशाम्बुजलोचनः ।	10
34)	रुक्मिणीसत्यभामाभ्यां मित्रविन्दादिभिस्तथा ।	9
35)	वितेने विविधश्चर्याश्चर्यालोकविलक्षणाः ।	7
36)	शून्यशून्या दिशः पश्यन् दीर्घदीर्घं विनिश्वसन् ।	18
37)	श्रुत्वा देवं महात्मानं सम्प्राप्तं शाश्वतं पदम् ।	17
38)	सत्यसन्धैर्महाभागैरपि यत्तु प्रतिश्रुतम् ।	30
39)	सत्यसन्धो हरिश्श्रीमान् गोपालाकृतिसुन्दरः ।	14
40)	हरिदर्शनवैधुर्याद्यावद्दूनमना मुनिः ।	39

सप्तमोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अगस्त्यक्षेत्रमध्येऽस्मिन् भजतां हर्षवर्धनः ।	52
2)	अथ तं दूनहृदयं प्राञ्जलिं पुरतः स्थितम् ।	1
3)	अथ तत्र जगन्नाथो हरिः प्रादुर्भविष्यति ।	45
4)	अथ सप्तसु यातेषु दिनेषु शशिशेखरः ।	24
5)	अथ स्मित्वाऽब्रवीद्देवः को नु तेऽभीप्सितो वरः ।	28
6)	अन्यत्र युगसाहस्रैः क्षेत्रे यत्साध्यते फलम् ।	48
7)	अवात्सीदृषिभिस्तत्र पूजितस्स दयानिधिः ।	51
8)	अस्मात्प्रियतमो मन्त्रो नान्योऽस्ति श्रीपतेर्मुने ।	40
9)	आदध्महेऽञ्जलिं मूर्ध्नि महिम्नेऽस्य जगत्पतेः ।	10
10)	आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।	29
11)	इति तेनार्थितो देवश्शङ्करो लोकशङ्करः ।	32
12)	इतो गव्यूतिमात्रे त्वं क्षेत्रे रम्ये जटायुषः ।	43
13)	इत्यभिष्टूयमानोऽयं तेनागस्त्येन नारदः ।	20
14)	इत्युदीर्य तदा वीणां वादयन्नारदो मुनिः ।	16
15)	इत्युदीर्य स भूतेशो भक्त्या तेनाभिवन्दितः ।	50
16)	इत्युमापतिनागस्त्यश्चोदितो मुनिसत्तमः ।	30

In Public domain. Digitization Muthulakshmi Research Academy

17) इदं रहस्यं परममिदं लक्ष्मीप्रदं नृणाम् । 38
18) इदं राज्यप्रदं दिव्यमिदं सर्वेष्टसाधनम् । 39
19) इममेवार्थमुद्दिश्य वरं प्रादाज्जटायुषे । 46
20) उपस्पृष्टोदके तस्मिन्नगस्त्ये पार्वतीपतिः । 33
21) एवं विषयसङ्क्षुब्धचित्तान् भक्तान् जनार्दनः । 6
22) किं प्राकृत इव त्वं च विक्लबश्चेद्ब्रवीम्यहम् । 4
23) गते तु नारदे श्रीमानगस्त्यस्तद्वचो मुहुः । 21
24) चिन्ता मोहपरीतं मां वाङ्मयैस्त्वं सुधामयैः । 19
25) तं तदा प्रस्थितं दृष्ट्वा लोपामुद्रापतिर्मुनिः । 17
26) तथामय्यपि विश्वासं महान्तं कुरु मन्त्रदे । 41
27) तदद्य परमर्षे त्वं समाहितमना मनाक् । 11
28) तमग्रतो विलोक्याथ प्रत्युत्थाय कृताञ्जलिः । 25
29) तस्मादत्रैव विधिवज्जटायुक्षेत्रमण्डले । 49
30) तावत्सुधारसासिक्त इव हृष्टतनूरुहः । 27
31) तेन मन्त्रेण भक्त्या त्वं पुनस्सप्तदिनान्यहो । 13
32) त्वादृशामपि देवस्य तस्य माया दुरत्यया । 9
33) दुर्लभं वर्षसाहस्रैरिदं रामतारकम् । 36
34) ध्यायन् रघुपतिं देवं शरणागतवत्सलम् । 44
35) न कदाचिदपि श्रीशो विजह्यात् सत्यसन्धताम् । 7
36) न हि तत्करुणायाश्च न पात्रमसि सुव्रत । 5
37) न हि वैषम्यनैर्घृण्ये विद्येते परमात्मनः । 8
38) नासाग्रन्यस्तनयनो वक्षोविष्टभ्यचात्मवान् । 23
39) नित्यं त्रिषवणस्नायी निराहारो जितेन्द्रियः । 22
40) पुरहरपरमाज्ञया मुनीन्द्रस्सरभसमेत्य वनं ततो जटायोः । 53
41) प्रणतं तं समुद्वीक्ष्य शङ्करस्तुष्टमानसः । 26
42) प्रीतस्त्वत्तपसा देवश्शम्भुस्त्वन्नेत्रगोचरः । 14
43) भवतश्च जटायोश्चाप्याभीष्टपरिपूर्तये । 47
44) भवान्धतमसभ्रान्तानुद्धर्तुं ज्ञानदुर्गतान् । 18
45) मन्त्रराजप्रभावेन शरत्सूर्यमिवोज्ज्वलम् । 35
46) मन्त्राणां परमो मन्त्रस्सोऽयं मुनिवर त्वया । 37
47) यथा देवे तथाचार्ये भक्तिः कार्या विजानता । 42
48) यदुत्साहेन संसिध्येन्नहि तच्चिन्तया क्वचित् । 3
49) वरः कोऽपि न मेऽभीष्टो भगवद्दर्शनाद्दते । 31

In Public domain. Digitization Muthulakshmi Research Academy

50)	विदितं चिन्तितं सर्वं महर्षे भवतो मया ।	2
51)	वैक्लब्यं तव वीक्ष्याहमुपायं वक्तुमागतः ।	15
52)	श्रुतमात्रान्मनो तस्मात्तस्य श्रीरभ्यवर्धत ।	34
53)	स तु त्वत्तपसा प्रीतस्समतीतेऽह्नि सप्तमे ।	12

अष्टमोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अथ तत्राश्रमपदे मुनीन्द्रस्स तपश्चरन् ।	22
2)	अथ प्रसन्नो भगवांस्तपसा तस्य विस्मितः ।	5
3)	अनाहारोऽप्रमत्तोऽयं पश्यन् राममयं जगत् ।	4
4)	अनुग्रहाद्युज्वलदिव्यसुन्दरीकरारविन्दोच्चलचामरोत्करैः ।	38
5)	असङ्ख्यादिव्यनागेन्द्रानिस्सङ्ख्यादिव्यवाजिनः ।	15
6)	उन्नम्य वदनं शश्वद्दिवि दत्तविलोचनः ।	25
7)	उन्निद्ररोमा तज्ज्योतिरद्भुतं वीक्ष्य भूपते ।	27
8)	कमप्यानन्दमापेदे बाष्पपर्याकुलेक्षणः ।	28
9)	कुमुदादिगणाध्यक्षचोदितास्सायुधास्तदा ।	12
10)	कृपया भगवानद्य नूनं प्रादुर्भविष्यति ।	24
11)	कोटिशः पुण्डरीकेन्दुनिभाश्चत्र परम्पराः ।	13
12)	क्षणान्निमीलिताक्षोऽभूत् क्षणं विस्फारितेक्षणः ।	31
13)	जगौ किमपि सानन्दं जहास च पुनः पुनः ।	30
14)	जजाप परमं जप्यं रामतारकमादृतः ।	3
15)	ततः क्षणादग्रभुवि ध्वजोल्लसत्तुरङ्गदन्तीन्द्रविमान-कोटिभिः ।	33
16)	तदन्तरेऽत्युच्च हिरण्यभूमिभृन्निषण्णगम्भीरघनाघन-च्छविम् ।	37
17)	तुरङ्गगम्भीरतरङ्गबन्धुरं विमानराजोडुपकोटिसङ्कुलम् ।	35
18)	तेन स्निग्धगभीरेण नादेन महता नृप ।	21
19)	ददर्श भुवनं सर्वं स मुनिर्भगवन्मयम् ।	32
20)	दर्भेष्वथ समासीनो धृतदर्भो महामनाः ।	1
21)	दिवि भास्करकोटीनां कोटयो युगपद्यदि ।	29
22)	दिवोऽवतीर्णां सुरनिम्नगां पुरा सधर्मिणीं स्वामनुकर्तुमिच्छया ।	36
23)	दिव्यकाहलनिर्घोषान् सर्वश्रुतिमनोहरान् ।	23
24)	नाकुण्डली नामकुटी नास्रग्वी नाल्पभोगवान् ।	18
25)	प्रचलत्किङ्किणीमञ्जुशिञ्जितध्वनिरञ्जितैः ।	8

26)	प्रस्थिते सर्वलोकानां शरण्ये कमलासखे ।	19
27)	भगवन् विजयस्वेति नित्या मुक्तास्तदाऽस्तुवन् ।	10
28)	महर्षेरुत्सुकस्यैवं दिवं समभिपश्यतः ।	26
29)	महानुभावं शरदिन्दुनिर्मलस्मितोल्लसद्दिव्यकपोल-सुन्दरम् ।	39
30)	महार्घलावण्यसरित्तनूर्मिकावलित्रयावर्तितनाभिसुन्दरम् ।	43
31)	विमलोत्कर्षिणीज्ञानक्रियायोगा तथैव च ।	7
32)	विश्वक्सेनोऽग्रतस्तस्य हस्तालम्बं ददौ स्वयम् ।	6
33)	विष्टब्धहृदयश्श्रीमान् प्राणानायम्य वाग्यतः ।	2
34)	वीणावेणुमृदङ्गौघपटहानकगोमुखान् ।	20
35)	वैजयन्त्योऽप्यसङ्ख्याता मन्दमारुतकम्पिताः ।	14
36)	शेषः पूर्णेन्दुसङ्काशं छत्रं जग्राह भास्वरम् ।	9
37)	श्रियश्श्रियं सर्वजगत्पतिं हरिं परात्परं निर्मलमादिपूरुषम् ।	44
38)	सपक्षमिव हेमाद्रिं गरुत्मन्तं रमासखः ।	11
39)	समुच्चलच्चामरफेनदन्तुरं स्फुटातपत्राब्जपरं परान्तरम् ।	34
40)	सर्वे दिव्याम्बरधरास्सर्वे कुण्डलमण्डिताः ।	16
41)	सर्वे पूर्णेन्दुवदनास्सर्वे कमललोचनाः ।	17
42)	सशङ्खचक्राब्जगदासमुल्लसच्चतुर्भुजं नित्ययुवानमच्युतम् ।	42
43)	सितांशुबालाभललाटपट्टिकासमुल्लसत्कुङ्कुमचित्रकाङ्कुरम् ।	41
44)	स्फुरन्महारत्नकिरीटकुण्डलं प्रकाशमानाङ्गदमञ्जुलोर्मिकम् ।	40

नवमोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अकृत्वा गृध्रराजस्य तादृशीं प्रत्युपक्रियाम् ।	51
2)	अथ सूत्रवतीनाथवेत्रकम्पनचोदिताः ।	59
3)	अथाग्रतो हरिं वीक्ष्य नारायणमनन्यधीः ।	1
4)	अनन्यशरणानान्त्वं प्रदत्से यां गतिं विभो ।	28
5)	अनेन तुष्टो भविता जटायुर्नात्र संशयः ।	53
6)	अलमेतावता श्रीमन् प्रार्थनेन जगत्पते ।	29
7)	अस्मै वरश्च देवेन वासायात्र प्रतिश्रुतः ।	54
8)	इति प्रपन्नं पदयोस्तमुद्वीक्ष्य तपोधनम् ।	30
9)	इति विज्ञापयन्तं तमगस्त्यं वीक्ष्य माधवः ।	45
10)	इति संहृष्टसर्वाङ्गः कृताञ्जलिपुटो हरिम् ।	43

In Public domain. Digitization Muthulakshmi Research Academy

11)	इत्यनुग्रहसान्द्रान्तां नारायणवचस्सुधाम् ।	17
12)	इत्युक्त्वा भगवद्दत्तं दिव्यं तं विग्रहं हरेः ।	39
13)	इत्युक्त्वा भगवान् दिव्यां सुरूपां प्रतिमां मुनेः ।	36
14)	इत्युदीर्य जगन्माता प्रहृष्टं वदनं हरेः ।	58
15)	उपेत्य निकटं तस्य प्रणतं मुनिसत्तमम् ।	6
16)	उपैक्षिषि मनाक् तात माज्ञासीरन्यथा क्वचित् ।	15
17)	ऋतौ वसन्ते वैशाखे मासे तस्मिंस्तपोधनः ।	64
18)	एनामाराधयाजस्रमेनां ध्यातुमिहार्हसि ।	38
19)	एवमेव त्वमप्यन्ते परमानन्दनिर्भरः ।	34
20)	कच्चिद्दृष्टं त्वया श्रीमन् सर्वं मद्वैभवं मुने ।	32
21)	क्षणादन्तर्हिते तस्मिन् देवे सर्वजगत्पतौ ।	63
22)	गरुडादवतीर्याथ शेषेणार्पितपादुकः ।	3
23)	चिराद्दृष्टं तमालोक्य मुनीन्द्रं तपसा कृशम् ।	8
24)	जटामकुटविन्यस्तप्रार्थनाञ्जलिकुड्मलः ।	2
25)	तं प्रतिष्ठापयामास वेणुगोपालमच्युतम् ।	66
26)	तत्पारय कृपासिन्धो मदाश्रमपदे वसन् ।	27
27)	तदभिप्रायमाज्ञाय सुस्मेरवदनाम्बुजा ।	46
28)	तदुत्तिष्ठ सुनिर्वृत्तं तपसा ते प्रयोजनम् ।	16
29)	तदैवापूरयिष्यं चेद्वत्स तेऽभीप्सितं मुने ।	14
30)	तपसासि परिश्रान्तो मत्कृते मुनिसत्तम ।	10
31)	तातत्वत्तपसा तुष्टो देवः प्रादत्त ते वरम् ।	47
32)	तोषितस्तपसा तेऽद्य प्रसन्नहृदयो मुने ।	9
33)	त्वं हि धाता विधाता च त्वमिन्द्रस्त्वं चतुर्मुखः ।	20
34)	त्वदायत्तमिदं सर्वं त्वयि न्यस्तभरा वयम् ।	21
35)	त्वद्भयाद्वहते वायुरुदेति त्वद्भयाद्रविः ।	24
36)	त्वां प्राप्य न विवर्तन्ते ज्ञानिनस्त्वदुपासकाः ।	23
37)	दधानमूर्ध्वबाहुभ्यां पाञ्चजन्यसुदर्शने ।	41
38)	दिव्यतूर्याण्यनाद्यन्त शतशोऽथ सहस्रशः ।	61
39)	नमस्ते पूण्डरीकाक्ष नमस्ते जगतां पते ।	18
40)	नाथ त्वत्कृपया धन्योऽस्म्यन्यन्नास्ति मदीप्सितम् ।	44
41)	नाभिलष्यामि भवतो दर्शनादपरं वरम् ।	25
42)	नित्याञ्जलिपुटा हृष्टा नम इत्येव वादिनः ।	33
43)	परिपूर्णे हरिः श्रीमानगस्त्यमनोरथे ।	60

44)	पुष्पवृष्टिरभूद्दिव्या वैजयन्त्यश्चकम्पिरे ।	62
45)	प्रचुरकुसुमवृष्टिस्स्वर्गतो निर्गलन्ती	67
46)	प्रदाय कृपयाविष्टः पुनरेवं वचोऽब्रवीत् ।	37
47)	बर्हिबर्हकृतोत्तंसं वेणुवादनलोलुपम् ।	40
48)	भवतश्च जटायोश्च देवस्य च ममापि च ।	55
49)	भविष्यति जगत्ख्यातं नामास्त्येतज्जगत्पतेः ।	57
50)	मदनाकृतिरम्यत्वाद्दिव्यमङ्गलविग्रहः ।	56
51)	य इदानीं त्वया लब्धो दिव्यमङ्गलविग्रहः ।	52
52)	य एतत्तारकं मन्त्रं जपेन्नियममास्थितः ।	12
53)	यत्त्वया प्राक्प्रतिज्ञातं त्वदाश्रमपदे तदा ।	26
54)	यथा तारकमन्त्रेण सिद्धिस्स्यादविलम्बितम् ।	11
55)	यद्योजनत्रयं ह्येतत्त्वदाश्रमपदं मुने ।	48
56)	यश्चक्षुषि य आदित्ये पुरुषे चापि तिष्ठति ।	22
57)	रामो दाशरथिः पूर्वं यस्त्वयास्मि विलोकितः ।	13
58)	रावणेन चिरं युध्वा मदर्थं त्यक्तजीवितः ।	50
59)	वदन्ति श्रुतयस्त्वां हि जगज्जन्मादिकारणम् ।	19
60)	विमलादिपराम्बोजचलच्चामरवीजितः ।	4
61)	सत्यमेव त्वया प्रोक्तं नात्र कश्चन संशयः ।	31
62)	समग्न इव दुग्धाब्धौ सुधाभिरिव सेचितः ।	7
63)	सरितो निर्मलाख्यायाः प्राच्यां दिशि तपोधन ।	49
64)	साकं लक्ष्म्या जगद्धात्र्या धरण्या चापि नीलया ।	5
65)	साम्प्रतं प्रतिमामेतां गोपवेषमनोहराम् ।	35
66)	सोऽयं मदनगोपालो मया लब्धो हरिश्चिरात् ।	42
67)	स्थिरे लग्ने शुभतमे सम्पन्नैस्सकलैर्गुणैः ।	65

दशमोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अत्र सप्तनदीसङ्गे स्नात्वा दृष्ट्वा च शङ्करम् ।	8
2)	अथ तत्र प्रतिष्ठाप्य वेणुगोपालमच्युतम् ।	1
3)	अनिश्चितमतिर्मर्त्यो गत्वापि क्षेत्रमुत्तमम् ।	31
4)	अमुमत्रस्थितं देवास्सिद्धगन्धर्वचारणाः ।	6
5)	इति तद्वचनं श्रुत्वा कृष्णद्वैपायनो मुनिः ।	25

 In Public domain. Digitization Muthulakshmi Research Academy

6)	इति पाण्ड्यमहीपालः पाराशर्येण चोदितः ।	19
7)	इति बोधितोऽथ मुनिवर्य गिरा सतुपाण्ड्यभूपतिरुदारमतिः ।	33
8)	इतीदं पाण्ड्यराजेन्द्र रहस्यं श्रेयसां पदम् ।	16
9)	इदं शरण्यन्महाख्यानं गोपालस्य रमापतेः ।	15
10)	एष नारायणः श्रीमान् श्रीवैकुण्ठनिकेतनः ।	13
11)	करवीरैर्मल्लिकाभिः केतकीभिश्च चम्पकैः ।	3
12)	किञ्चित्वामपि पृच्छामि कुत्रासि प्रस्थितोऽधुना ।	17
13)	कृतस्नानोऽथ कृष्णायां जपन्मन्त्रं तदन्तरे ।	22
14)	कृताह्निको महातेजा जपन् श्रीरामतारकम् ।	2
15)	कृपया वेणुगोपस्य प्राप्नोत्येव न संशयः	12
16)	गोभूहिरण्यरूप्यादि यद्यदत्र प्रदीयते ।	14
17)	गोवर्धनद्वारकयोर्व्रजबृन्दावनादिषु ।	27
18)	तत्तत्क्षेत्रेषु वसतो दर्शनात्कमलापतेः ।	28
19)	तदत्र परमोदारगभीरगुणसागरम् ।	30
20)	तदहं श्रोतुमिच्छामि किं निमित्तमिहागतः ।	18
21)	तस्मात्त्वमपि राजेन्द्र निस्सन्देहमना इह ।	32
22)	नान्यद्गोपालबालस्य क्षेत्रमस्मादनुत्तमम् ।	29
23)	निक्षिप्य सचिवे राज्यं निर्गतो नगरान्निजात् ।	21
24)	पुत्रार्थी प्राप्नुयात् पुत्रान् धनार्थी च तथा धनम् ।	10
25)	महर्षे तमिमं देवमत्र वीक्ष्य रमापतिम् ।	23
26)	मालतीकुसुमैश्चापि सुगन्धितुलसीदलैः ।	4
27)	यथा श्रीरङ्गमाद्यं तद्यथा श्रीवेङ्कटाचलः ।	7
28)	राजन् किं क्षेत्रसाहस्रैस्सेवितैश्शृणु मे वचः ।	26
29)	विद्याकामः परां विद्यां मोक्षकामः पराङ्गतिम् ।	11
30)	श्रुत्वा तद्वदनादस्य कथामपि सुधोपमाम् ।	24
31)	श्रुत्वा भागवतं दिव्यं भगवन् हृष्टमानसः ।	20
32)	स एष भगवानद्य त्वया दृष्टो विशाम्पते ।	5
33)	सर्वपापानि धून्वन्ति प्राप्नुवन्त्यखिलं शुभम् ।	9

एकादशोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	अग्रतः कञ्चनस्थूलमुपलं वीक्ष्य सादरम् ।	9

In Public domain. Digitization Muthulakshmi Research Academy

2) अग्रतो नैव गन्तव्यं भवताऽहोबिलं प्रति । 23
3) अथ प्रफुल्लरोमाऽयं वटुस्सिंहवटाभिधः । 15
4) अथ बद्धाञ्जली राजा तद्वाक्यमनुचिन्तयन् । 1
5) अध्यर्धयोजनेह्यस्मात् क्षेत्रादुत्तरभागतः । 7
6) अभिपूज्य मुनिं मुदा स यावत्तदनुज्ञां । 36
7) इति तेनार्थितः श्रीमान् कृष्णद्वैपायनो मुनिः । 4
8) इति तेनार्थितो देवो नरसिंहः कृपान्वितः । 20
9) इति मुनिगदितं निशम्य वृत्तं धरणिपतिस्स । 34
10) इतीदं सर्वमाख्यानं नरसिंहस्य भूपते । 31
11) इत्युदीर्य नृसिंहोऽसौ प्रविष्टस्तां शिलां तदा । 26
12) इमं सिंहवटक्षेत्रे नरसिंहोद्भवं नरः । 30
13) उत्तिष्ठ नरशार्दूल कुरु माध्यन्दिनीं क्रियाम् । 33
14) उदीक्ष्य तं भयत्रस्तो बाष्पपर्याकुलेक्षणः । 17
15) ख्यातिं गमिष्यति क्षेत्रमिदं सिंहवटाख्यया । 25
16) चक्रोज्वलाङ्गीं तामेतां नरसिंहमयीं शिलाम् । 27
17) चापलात्प्रार्थितं देव मयाऽल्पमतिना हरे । 18
18) जहीहि मोहमुद्भूतं मया विश्वमिदं ततम् । 24
19) तत्र मध्याह्नसमये स्नात्वा सरसि निर्मले । 8
20) तत्राभीष्टं फलत्याशु ग्रहपीडा प्रणश्यति । 28
21) तत्राल्पमपि यद्दत्तं प्रीत्यै तन्नृहरेर्भवेत् । 29
22) तथाद्यात्र स्वकं रूपं प्रस्तरे मे प्रदर्शय । 11
23) तस्य लीलानरहरेस्तत्राविर्भावकारणम् । 3
24) तात त्वत्प्रार्थनामेनां निमित्तीकृत्य साम्प्रतम् । 21
25) दंष्ट्रा करालवदनं सटाधूतमहाम्बुदम् । 16
26) धन्योऽस्म्यनुगृहीतोऽस्मि स्वंरूपमुपसंहर । 19
27) निशम्य गम्भीरमुदारमद्भुतं मृदङ्गवीणापणवादिनिस्वनम् । 37
28) पुनस्तव प्रार्थनया प्रविशामि शिलामिमाम् । 22
29) पुरा सिंहवटो नाम वटुः कश्चिद्विशाम्पते । 5
30) प्रणम्य नन्दव्रजगोपकन्यकामनोज्ञकौमारहरं परात्परम् । 38
31) प्रादुर्भूतः प्रस्तरेऽस्मिन्नरसिंहाकृतिर्भवान् । 12
32) बद्धाञ्जलिपुटेनेत्थं प्रार्थितो वटुना हरिः । 13
33) भिन्दंस्तं प्रस्तरं तत्र क्षणेन करुणानिधिः । 14
34) यत्त्वयाभिहितं क्षेत्रं सिंहवटाभिधम् । 2

In Public domain. Digitization Muthulakshmi Research Academy

35)	यथा प्रह्लादहेतोः प्राक्सर्वात्मत्वं प्रकाशयन् ।	10
36)	स तस्य पादाववनिज्य भूपतिर्मुदा शिरस्तत्र निवेश्य भक्तितः ।	35
37)	सेवितुं कृतसङ्कल्पो गङ्गाकूलाद्विनिर्गतः ।	6
38)	हरेर्मदनगोपस्य पूजामाध्याह्निकी नृप ।	32

द्वादशोऽध्यायः

क्र.सं	श्लोकाः	श्लो.सं
1)	(..देवं?)तं वेणुगोपालमर्चयन् पाण्ड्यभूपतिः ।	12
2)	अथ सर्वेऽपि मुनयस्तत्कथाश्रवणाद्द्विजाः ।	1
3)	अभिषिच्य प्रहर्षेण तीर्थैर्देवपदोद्गतैः ।	6
4)	आहूयाथ स्विकां सेनां वेणुगोपालसन्निधौ ।	5
5)	इति तैस्संस्तुतो राजा कृत्वा माध्याह्निकीं क्रियां(..) ।	3
6)	उत्सवान् कारयामास पञ्चरात्रविधानतः ।	10
7)	एष पाण्ड्योऽपि गोपालमर्चयन् जायया सह ।	9
8)	कच्चिद्भवद्भिः प्रयतात्मचित्तैः श्रुतं मयोदी(रीतम..)द्य विप्राः।	17
9)	कथितमिति महत्पवित्रमार्षं चरितमिदं किल गोपवेषविष्णोः ।	16
10)	तत्प्रीत्यै वितताारैष रत्नहेमपरिच्छदान् ।	11
11)	तत्र देशे शान्तिधना ज्ञानिनो ब्राह्मणोत्तमाः ।	14
12)	तदेतत्परमं क्षेत्रं मङ्गलानां च मङ्गलम् ।	13
13)	पुत्रस्तु राज्यं स्वं प्राप्य गोपालं चिन्तयन् हरिम् ।	8
14)	राजंस्त्वयि समायाते महाभागवतोत्तमे ।	2
15)	शुभ्रे प्रस्थापयामास लग्ने तं स्वपुरं प्रति ।	7
16)	संसेव्य धन्यमात्मानं मन्यमानो महामनाः ।	4
17)	सदा मदनगोपालपादाब्जन्यस्तमानसाः ।	15

****

In Public domain. Digitization Muthulakshmi Research Academy

ISBN - 978-81-969575-8-2
In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णकविप्रणीतानि काव्यानि अकाडम्या मुद्रितानि

1) रघुनाथविजयचम्पूः
2) श्रीनिवासविसालचम्पूः
3) उत्तररङ्गमाहात्म्यम्
4) रामेश्वरविजयचम्पूः
5) मदनगोपालमाहात्म्यम्

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2024